इत्यादि वचन से वेद में नित्यत्व का प्रतिपादन होता है । अतः नित्य निर्दोष-अपौरुषेय वेद को होने से, तादृशवेदके उत्पादकरूप से ब्रह्म में सर्वज्ञत्व नहीं हो सकता है । न वा वेद के उपादानकारणत्व से भी परमेश्वरमें सर्वज्ञता की सिद्धि हो सकती है, क्योंकि - उपादान उपादेय में सर्वत्र सजातीयत्व देखने में आता है, जैसे घट मृत्तिका में । यहां तो जगत् का उपादान ब्रह्म है, और उपादेय जगत् जडचेतन है, तब विजातीय में कार्यकारणभाव किस प्रकार से होगा ? यदि कदाचित् द्रव्यत्व प्रमेयत्व व्यापकधर्म से सजातीय मान कर प्रतिपादन करें तो भी वर्णपारायणतः जो व्यापृत है, उसका ज्ञान नहीं होने से वेदकर्तृत्वरूप से ब्रह्म का सर्वज्ञता सिद्ध नहीं होगी । यह हुआ पूर्व पक्ष, इस का उत्तर है कि - ब्रह्म को सम्पूर्ण—वेदजनकत्वरूप से सर्वज्ञत्व सिद्ध होता है, इसकी सर्वज्ञतामें अनेक श्रुति प्रमाण है । यथा "रूपस्मत ह ते भूतस्य विश्वमात्मने" इति यजुर्वेदे, सामवेदोऽथर्ववेदो वा अङ्गिरसः तस्य पुराणविद्या उपनिषदः श्लोकाः सूत्राण्यनुव्याख्यानि" इस महान् पुरुष का

"तं त्वौपनिषदं पुरुषं पृच्छामी"–त्यादिशास्त्रे प्रोच्यमानं बाध्येत। उपनिषत्स्वेवाधिगत औपनिषदः। यथा–स्वर्गापूर्वादिकं शास्त्रमात्रसमधिगम्यं न तु प्रमाणान्तरगम्यम्, एवमेव प्रकृतेऽपि शास्त्रप्रमाणमात्रगम्यता ब्रह्मणः। न च यदि ब्रह्म शास्त्रप्रमाणकं तदा पूर्वसूत्र एव "यतो वा इमानी"—त्यादिशास्त्रेण शास्त्रप्रमाणकत्वं तस्य सिद्धमेव तत्कथमिदं सूत्रान्तरमिति वाच्यम्। पूर्वसूत्रे स्पष्टरूपेण तत्कथनात् कदाचिदनुमानादिगम्यत्वमपि कोऽपि विजानीयादिति सन्देहनिवृत्त्यर्थं सूत्रान्तरस्य कर्तुमौचित्यात् वेदान्तवाक्यलक्षणप्रसूतावगमनमेव सूत्राणां प्रयोजनमिति ॥

अथवा यद् बह्वर्थसूचकं भवेत् तत् सूत्रम्। इदमपि बहुमर्थं सूचयति, ततश्च शास्त्रयोनिरित्यत्र षष्ठीतत्पुरुषसमासमादृत्य शास्त्रस्य ऋग्वेदादेरनेकशाखास्थानयुक्तस्य मायादिवत् सकलपदार्थावभासनसमर्थस्यात एव सर्वज्ञकल्पस्य योऽप्रयत्नेन लीलान्यानेन निर्माणं चकार स परमेश्वरोऽतिशयेन सर्वज्ञः। अर्थात् परमेश्वरः केवलं भूतभौतिकप्रपञ्चस्यैव न जनको-

निःश्वासस्वरूप यह ऋग्वेद यजुर्वेद सामवेद अथर्वाङ्गिरस इतिहास पुराण विद्या उपनिषद् श्लोकसूत्र और उन सबका अनुव्याख्यान को बनाया। (जिसतरह हमलोगो को निःश्वास होने में परमात्मविशेष की आवश्यकता नहीं होती है, उसी प्रकार लीलान्याय से परमेश्वरने अनन्य प्रयत्न से इन वेदो को उत्पन्न किया) एवं "छन्दांसि जज्ञिरे" परमेश्वरने छन्दो को बनाया। इत्यादि वेद प्रमाण से सिद्ध होता है कि - परमेश्वर वेद का उत्पादक है, यह सिद्ध होता है। यहां प्रमाणान्तर से अर्थ समझकर तदनुरूपेन वेद का निर्माणकर्तृत्व नहीं है जिससे कि - विषयापेक्ष होने से वेद में पौरुषेयत्व की आपत्ति होती है, नवा केवल उच्चारयितृत्वरूप कर्तृत्व है; जिससे कि - अस्मदादि अध्यापकसदृश हो जाने से विशिष्टब्रह्मकर्तृत्व वेद में सिद्ध नहीं होगा इसलिये सृष्टिके पूर्व में यादृशक्रमस्वरवर्णानुपूर्वीमान् वेद था, तादृशक्रमस्वरवर्णानुपूर्वीविशिष्ट वेद का निर्माण कर लोकों मे उस वेद का प्रचार करते हैं, लोकभिन्न परमेश्वर।

ऽपि तु असौ नैयायिकाभिमतशब्दराशिभूतस्य शास्त्रस्यापि जनकोऽस्त्येव, "अस्य महतो भूतस्य निःश्वसितमृग्वेदः" इत्याद्यनेकश्रुतिभिः परमेश्वरस्य वेदजनकत्वश्रवणात् । न च ककारादिवर्णानां प्रत्यभिज्ञया युक्त्यन्तरेण नित्यत्वश्रवणात्तद्राशिरूपस्यापि तथात्वात् कथं तज्जनकत्वं परमेश्वरस्य न हि नित्यस्योत्पत्तिः क्वचिद् दृष्टा श्रुता वोपपद्यते वाचाम्, प्रत्यभिज्ञाया जातिविषयकत्वेन वर्णनित्यतायामौदासीन्यात् । किंच मीमांसकमते वर्णस्य नित्यत्वेऽपि वर्णपदवाक्यानुपूर्वीविशिष्टस्यानित्यत्वात् । वैयासिकमतमनुवर्तमानास्तु न नैयायिकवत् प्रतिक्षणविनाशित्वं मीमांसकवदपि न सर्वथा नित्यत्वमनुमन्यन्ते, अपि तु सर्गादौ जायमानत्वं प्रलये प्रलीयमानत्वं च मन्यन्ते, यदपि वेदानां नित्यताप्रतिपादकं वचनं तदप्याकाशादिवदेव चिरस्थेमानमेव प्रज्ञापयति । परन्तु यादृशानुपूर्वीको वेदः प्राक्सर्ग आसीत् तदनुपूर्वीविशिष्टमेव वर्णराशिलक्षणं वेदं प्रज्ञापयति परमेश्वरः । अत एव प्रत्युच्चारणे भिद्यमानेऽपि न त्यजति कदा

"धाता यथापूर्वमकल्पयत्" "परमेश्वर जिस प्रकारक क्रमानुपूर्वीक वेद था, तादृशानुपूर्वीक ही वेद का निर्माण करते हैं" इत्यादि प्रमाण से सर्वज्ञत्व सकलवेदकर्तृत्व परमेश्वर में सिद्ध होता है, यही परमात्मा में अन्यविलक्षण वेदकर्तृत्व है कि - अन्यसंकलितक्रमवर्णाद्य न होने से स्वातन्त्र्येण पूर्वकल्पस्थ स्वकृतक्रमानुपूर्वीयुक्त वेद को इस कल्प में भी बनाने से वेद का कर्ता कहलाते हैं। ऐसा हुआ तब वेद को परमात्मकर्तृक होने पर भी अनादिसिद्ध वर्णक्रमानुपूर्वी तथा अर्थ को यथापूर्वहोने से वेद में स्वतःसिद्ध प्रामाण्य तथा अपौरुषेयत्व भी सिद्धहोता है। सजातीयोच्चारणानपेक्षोच्चारणकर्तृत्व का नाम होता है पौरुषेयत्व यहां सजातीयोच्चारणसापेक्ष हो उच्चारणविषयता है, अतःइस वेद में अप्रामाण्य की शङ्का भी नहीं होती है, क्यों कि - अखिलहेयप्रत्यनीक— सकलकामनावान् नित्यनिरतिशय ज्ञान से अनुभूयमान है पदार्थसमुदाय जिसको तथा निरवधिकमहिमवान् भगवान् श्रीसाकेताधिपतिश्रीरामात्मक ब्रह्म का

चिद्प्यपौरुषेयत्वम् । सजातीयोच्चारणानपेक्षोच्चारणविषयत्वस्यैव पौरुषेयत्वम् । इह तु सजातीयोच्चारणसापेक्षत्वेन तथात्वाभावादिति कृतं पल्लवितेनेति प्रकरणान्तरे द्रष्टव्यः ॥३॥

इति जगद्गुरु-श्रीरामानन्दाचार्य- रामप्रपन्नाचार्य-योगीन्द्रकृतस्य श्रीरघुवरीय-वृत्तिविवरणस्य तृतीयं शास्त्रयोनित्वाधिकरणम् ॥ ३ ॥

तत्तु समन्वयात् १।१।४॥

तच्छास्त्रप्रमाणकत्वं ब्रह्मणः सम्भवति नवेति संशयः । तत्र शास्त्रस्य प्रवृत्तिनिवृत्त्यन्यतरप्रयोजनाभिधायितया ब्रह्मणश्च परिनिष्पन्नवस्तुतया न तस्य शास्त्रप्रमाणकत्वं सम्भवतीति पूर्वः पक्षः । अत्राभिधीयते– तुशब्दश्शङ्कां निवर्तयति । परिनिष्पन्नस्यापि ब्रह्मणो निरतिशयसुखरूपतया शास्त्रप्रमाणकत्वमस्त्येव । वेदान्तशास्त्रेण परमानन्दरूपस्य ब्रह्मणोऽभिधेयतयाऽन्वयात् । उपक्रमोपसंहारादिरूपतात्पर्यनिर्णायकैर्लिङ्गैस्समस्तानां वेदान्तानां परब्रह्मणि श्रीराम एव समन्वयः । स चेत्थम्– ‘सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्’, अत्र सूक्ष्मचिदचिच्छरीरं कारणरूपं ब्रह्मैव सत्पदेनाभिहितम् । ‘तदेव ब्रह्म त्वं विद्धि’ (के. १।१।

अथ यद्वस्तु संशयरहितं प्रयोजन-रहितं च भवति तादृशवस्तुनो जिज्ञासा न भवति, यथा समनस्कचक्षुरादिसंनिकृष्टो बहलप्रकावेद वचन है । जिस व्यक्ति का अन्तःकरण रागद्वेष से कलुषित है, तादृश व्यक्ति के वचन में ही अप्रामाण्य की शङ्का होती है । जब यह वेद उत्पत्तिमान् हुआ, तब विनाशी अवश्य होगा । इस तरह से त्रिक्षणावस्थायित्वप्रसङ्ग होता है, ऐसा नहीं कहना क्योकि–ऐसा मानने पर जिस वेद को पण्डितजी ने पढा, उसी वेद को मैं भी पढता हूँ, यह जो स्थायित्व की प्रत्यभिज्ञा होती है, उसका बाध हो जायगा । अतः यथोक्त ही सुस्थ है इस विषयका विस्तार विवरण अन्यत्र किया जायगा ।३।

सारबोधिनी—जो पदार्थ सन्दिग्ध तथा सप्रयोजनक होता है उसकी ही जिज्ञासा होती है, किन्तु जो पदार्थ सन्देह तथा प्रयोजसे नरहित रहता है

४।) 'तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय' (श्वे० ३। ८) अनया श्रुत्या परमात्मन एकस्यैव परिज्ञानेन मृत्युसन्तरणमुच्यते 'नान्यः पन्थाः' इति ह्युपायान्तरञ्च निषिध्यते। 'यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्रयन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म' (तै० ३।१।१) ब्रह्म वा इदमग्र आसीत्' (बृ० ४।१। १०) 'योह वै श्री रामचन्द्रः स भगवानद्वैतपरमानन्द आत्मा' (रा० ता०) 'आनन्दो ब्रह्म' (तै०) 'ब्रह्मवेद ब्रह्मैव भवति' (मु० ३।२।९) 'रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि। इति रामपदेनासौ परं ब्रह्माभिधीयते' (रा० पू० ता०) इत्यादिश्रुतयो ब्रह्मणः श्री रामस्यैव स्वरूपगुणविभूतिवर्णनं कुर्वत्यस्तत्रैव समन्विता भवन्ति। एवम् 'आत्मेत्येवोपासीत' (बृ० १।४।७) इत्याद्युपासनविध्यभिधानेनापि वेदान्तानां परमपुरुष एव समन्वयः।

शितो घटो न भवति केषांचिदपि जिज्ञासाविषयः। कुतः? संशयरहितत्वात्। तथा यद्वस्तु प्रयोजनरहितं भवति तदपि जिज्ञासितं न भवति यथा कीटपतङ्गादीनां दन्ताः। तथा प्रकृते ब्रह्मापि संशयप्रयोजनरहितमिति तदपि न जिज्ञास्यम्। तथा हि यः शरीरादीनां परिणामयिता स एव आत्मा ब्रह्म, स चायमात्मा सर्वेषां प्राणिनामहमस्मीत्यादि प्रत्यक्षेणैव ज्ञातत्वान्न भवति जिज्ञासाविषयः। एवमात्मज्ञानस्य प्रयोजन-

उसकी जिज्ञासा नहीं होती है। जैसे मनः संयोग विशिष्ट चक्षुः संनिकृष्ट प्रकाशादि संयुक्त घटकी जिज्ञासा कोई नहीं करता है क्योंकि—वह संदेहरहित तथा जलताड़नादिककार्य प्रयोजनरहित होने से वह भी जिज्ञासित नहीं होता हैं, अर्थात् सन्दिग्धत्व तथा सप्रयोजनत्व जिज्ञासा का व्यापक है। और जहाँ व्यापक नहीं होता है उस स्थल में व्याप्य भी नहीं रहता है, यथा व्यापक जो वह्नि उसका अभाव रहता हैं तो उस स्थल में व्याप्य धूम का अभाव अवश्य रहता हैं जलादिक में। इसी प्रकार जिज्ञासा का व्यापक है

अयमत्र निर्णयः— 'पृथगात्मानं प्रेरितारं च मत्वा' (श्वे० १।६) "भोक्ता भोग्यं प्रेरितारञ्च मत्वा" (श्वे० १।१२ 'नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्' (श्वे० ६।१३) "स कारणं करणाधिपाधिपः' (श्वे ६।९) 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम्' (बृ० ३।७।३) 'य आत्मनि तिष्ठन् यस्यात्मा शरीरम्' (बृ० ३।७।२२) इत्यादि-श्रुतयश्चिदचिदीश्वरस्वरूपाणि भोक्तृभोग्यनियन्तृतया पृथगुपवर्ण्याचिद्वस्तुनः स्वरूपपरिणामं चिद्वस्तुनो ज्ञानसङ्कोचविकाशरूपपरिणामं नियन्तुर्ब्रह्मणस्तादृशपरिणामराहित्यञ्च प्रतिपाद्य चिदचितोर्ब्रह्मशरीरत्वं ब्रह्मणश्च तदात्मतया तदन्तर्यामित्वं नित्यानवद्यत्वं चाभिदधते। एवञ्च सृष्टेः प्राक् (ङ्) नामरूपविभागानर्हसूक्ष्मचिदचिच्छरीरं ब्रह्मैव कारणम्। तदेव च नामरूपविभागार्हस्थूलचिदचिद्विशिष्टं सत्कार्यत्वं भजते। एतादृक्

मपि किमपि नोपलभ्यते सद्यस्तस्माद्ब्रह्म न जिज्ञास्यम्। अजिज्ञास्यत्वे च तत्प्रतिपादकवेदान्तशास्त्रस्यारम्भोऽपि न कर्तव्य इत्यादिशङ्कां प्रथमाधिकरणेन निराकृत्य प्रतिपाद्य च ब्रह्मणो जिज्ञास्यत्वम्, तदनु च जिज्ञास्यं ब्रह्म तत् किं लक्षणकमिति जिज्ञासाया अपि निराकरणं द्वितीयाधिकरणेन संपाद्य जिज्ञास्यवस्तुनि प्रमाणं किमित्यनुयोगे लक्षणप्रमाणाभ्यां वस्तुनः सिद्धिरिति सर्ववादिसर्वशास्त्रप्रसिद्धतया ब्रह्मणि लक्षणं

सन्देह तो सन्देह के अभाव में व्याप्य जो जिज्ञासा उसका अवश्यमेव अभाव है, तब ब्रह्मजिज्ञासा का व्यापक जो आत्मा उसका संदेह उसका अभाव होनेसे व्याप्य जो ब्रह्म जिज्ञासा सो नहीं हो सकती है। ब्रह्म शब्दका अर्थ है जो शरीरादिक को परिणमित करें उसको ब्रह्म कहते हैं, प्रकृत में शरीर के परिणमित करने वाला जीवात्मा है तो वह भी ब्रह्मपद बोध्य है और यह जीव तो कीट पतंग से लेकर देवर्षिपर्यन्त प्रत्येक प्राणीको शरीरेन्द्रियादि से भिन्नरूप से अहं इत्याकारक प्रत्यक्षानुभवसिद्ध होनेसे असंदिग्ध है, तब संदेहाभावसे जिज्ञासा किस तरह से हो सकती है। नहीं कहो कि—अहं स्थूलः अहं कृशः

स्वरूपं सामानाधिकरण्यमुखेन 'सर्वं खल्विदं ब्रह्म' (छा०) इत्यादिश्रुतिभिरुपपादितम्। न चैवं जीवपरयोस्स्वरूपस्वभावाभ्यां भिन्नत्वान्नित्यत्वाच्च वेदान्तप्रसिद्धाया एकविज्ञानेन सर्वविज्ञान प्रतिज्ञाया हानिरिति वाच्यम्। जीवेऽवस्थान्तरापत्तिरूपपरिणामस्याभ्युपगमात्तस्य ब्रह्मकार्यत्वेन नोक्तप्रतिज्ञाया हानिरित्यवेहि। इयांस्तु विशेषो यदचेतनवत्स्वरूपपरिणामो जीवे न भवति। अपि तु ज्ञानसङ्कोचविकाशरूपोऽन्यथाभाव एव स्वीक्रियते। 'न जायते म्रियते वा विपश्चित्' (छा० २। १८) इत्यादिकाः श्रुतयस्तु स्वरूपान्यथाभावरूपां जीवस्योत्पत्तिं वारयन्त्यश्चरितार्थाः। इत्थं परस्य ब्रह्मणः स्वरूपं तत्प्राप्त्युपायश्चाभिदधच्छास्त्रं तस्मिन्नेव कार्त्स्न्येन समन्वेतीति सिद्धम्।

इति श्रीरघुवरीयवृत्तौ समन्वयाधिकरणम्

चतुः सूत्री समाप्ता ॥

द्वितीयेन तृतीयाधिकरणेन च प्रमाणं तस्मिन्ब्रह्मण्युपदर्शितवान् यथाविधि। परन्तु शास्त्रप्रमाणकत्वं दर्शितं प्रतिज्ञामात्रेण हेतुस्तु न स्पष्टरूपेण दर्शितः न च प्रतिज्ञामात्रं वस्तुनः साधकं, नहि भवति पर्वतो वह्निमानिति प्रतिज्ञामात्रेण "संभावितः प्रतिज्ञायां पक्षः साध्येत हेतुने"त्यभियुक्तोक्तेरिति। ब्रह्मणि वेदान्तस्य प्रामाण्यं न संभवति तत्र ब्रह्मणि वेदान्तानां समन्वयासंभवादित्याकारक-शङ्कायाः समुच्छेदाय प्रक्रमते। कथं तृतीयाधिकरणेन शास्त्रप्रमाणकत्वं ब्रह्मणः, यतः "प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतके-

इत्याकारक प्रतीति होती है, तो इस प्रतीति के बलसे शरीर ही आत्मा सिद्ध होता है तदतिरिक्त आत्मा तो है ही नहीं तब यह प्रश्न ठीक नहीं है ऐसा नहीं कहना क्योंकि—शरीर आत्मा मानो तबतो जो मैंने बाल्यावस्था में माता-पिता का अनुभव किया था वही आज मैं पौत्र, दौहित्र का अनुभव करता हूँ इत्याकारक स्मरण नहीं होगा, क्योंकि बालकशरीर और वृद्धशरीर तो एक नहीं है। अवयव के उपचय अपचय से शरीर प्रतिक्षण में विनष्ट होनेसे विनाशी है।

न वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते" इति नियमात् यानि-शास्त्राणि सर्वाणि क्रियापरकाण्येव। "आम्नायस्य क्रियार्थत्वादानर्थक्य-मतदर्थानाम्" इति जैमिनीय-वचनात् शास्त्राणां क्रियापरत्वमेव। वेदान्त वाक्यानि तु न क्रिया-प्रतिपादकानि अक्रियार्थत्वात्, तत्कथं वेदान्तानां-ब्रह्मप्रतिपादकत्वमिति शङ्काया निराकरणाय चतुर्थाधिकरणीयं सूत्रमिदं प्रवर्तते 'तत्तु समन्वयात् ॥१।१।४॥

अत्र तत् इत्येकं पदम् तु इति द्वितीयं, समन्वयादिति तृतीयं पदम् एवं च पदत्रयघटितमिदं सूत्रम् तत्र तदिति प्रथमपदम् प्रकृतब्रह्मपरा-मर्शकतया द्वितीयान्तम्। अव्ययं तु पदं पूर्वशङ्काया निराकरणपरकम्। ततश्च जगज्जन्मादिकारणं ब्रह्म यत् तादृशं ब्रह्म शास्त्रप्रमाणेन सिद्धं तादृशपरमात्मानं वेदान्तवाक्यानि स्वकीयतात्पर्यबलेन प्रतिपाद-यन्त्येव। (उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम्। अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये')। एतानि उपक्रमादीनि तात्पर्यग्राहकलिङ्गसमन्वितानि वेदान्तवाक्यानि नियमतः परमात्मानं बोधयन्तीति। अत्र सर्वाण्यपि 'यतो वा इमानि भूतानि जायन्ते' इत्यादीनि यानि वेदान्तवाक्यानि तानि सर्वाण्यपि विषयः। संशयाकारं तु दर्शयति वृत्तिकारः। पूर्वोदीरित शास्त्रप्रमाणकत्वं ब्रह्मणः संभवति नवेति संशयः। इति वृत्तिः। अत्रापि विप्रतिपत्तिवाक्याधीन एव संशयः, स च परमात्मनिष्ठशास्त्रप्रतिपाद्यत्व

यदि बालकशरीर तथा वृद्धशरीर एक होता तब लघु शरीर से अनुभूत वस्तु का स्मरण होता। अन्यदृष्ट वस्तु का स्मरण अन्यव्यक्ति को नहीं होता है। और यहाँ जो मैंने बाल्यावस्था में माता-पिता का अनुभव किया था वही मैं अभी पौत्रादिका अनुभव करता हूँ इत्याकारक अनुसंधान नहीं होता, इसलिए शरीरादिरूप आत्मा नहीं है किन्तु शरीरादिभिन्न आत्मा है। एवं स्वप्ना-वस्थामें दिव्य शरीर को धारण करके तदुचित भोगको भोगता हुआ मनुष्य जाग्रत् अवस्था में कहता है कि मैं देव नहीं हूँ, मैं तो मनुष्य हूँ, इस प्रकार

प्रतिपाद्यत्वाभावप्रकारक एव एकधर्मिकविरुद्धानेककोटिकः संशय इति तल्लक्षणात् । तदुक्तं जगद्गुरुणा श्रीश्रियानन्दाचार्येण श्रौतप्रमेयचन्द्रिकायाम्–"एकस्मिन् संशयो भावाभावप्रकारिका मतिः" इति (१।३) तत्र शास्त्रस्य पुरुषहितोपदेशकस्य क्रियाप्रतिपादकप्रवृत्ति निवृत्त्यन्यतरजनकत्वेनैव प्रामाण्यम्' "आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानाम्" । तथा 'प्रवृत्तिर्वा निवृत्तिर्वा नित्येन कृतकेन वा । पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते' इति नियमात् वेदान्तवाक्यानां क्रियाप्रतिपादकत्वाभावात् तथा ब्रह्मणः परिनिष्पन्नत्वेन न शास्त्रप्रमाणकत्वम् कथमपि संभवतीति वृत्तिस्थितपूर्वपक्षवाक्यघटकाक्षरार्थः । पूर्वपक्षाभिप्रायस्तु इत्यम् तथा हि घटादिशब्देन कम्बुग्रीवादिमतोऽर्थस्यैव ज्ञानं जायते न तु घटपदेन पटाद्यर्थस्य बोधो जायते, तथात्वे एकस्य शब्दस्यार्थवाचकत्वप्रसङ्गात्, स च नेष्टस्तथात्वे तदितरपदानां वैयर्थ्यप्रसङ्गात् । तस्मात् पदपदार्थयोः संबन्धरूपशक्तिरपेक्षिता सा च अस्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकपरमेश्वरेच्छारूपा । यथा घटादिपदानामुपस्थितौ घटादिपदजन्यज्ञानस्यावश्यकता जायते तथा घटपदपदार्थ शक्तिज्ञानस्याप्यावश्यकता अन्यथा अमुकपदस्यामुकपदार्थवाचकत्वं नान्यस्येति व्यवस्था न स्यात् । तस्मात् प्रथमतः शक्तिज्ञानमावश्यकम् । शक्तिज्ञानं च वृद्धव्यवहारसाध्यम् । वृद्धव्यवहारश्च कार्यमात्रविषयकः, तथा हि कार्यताप्रतिपादकं तु भवति लिङादिपदम् 'घटमानय' इत्यादि प्रयोजकवृद्धवाक्यश्रवणानन्तरं प्रयोज्यवृद्धस्य घटाद्यानयने प्रवृत्तिमुप-

से देव शरीर का बाध होने पर भी अहमाकारक अनुव्रजन होने से देह आत्मा नहीं है, किन्तु देहादि से अतिरिक्त आत्मा है सो यह आत्मा सर्वानुभवसिद्ध होने से संदेहरहित है । तब एतादृशसंदेहरहित आत्मा की जिज्ञासा नहीं हो सकती है । इत्यादिरूप से जो शास्त्र के अनारभ्यत्वप्रयोजक जो शंका थी उस शंका का प्रथम अधिकरण से निराकरण कर ब्रह्म में जिज्ञास्यत्व का प्रति-

लभ्य तत्समीपस्थो व्युत्पत्तिमिच्छन् बालकस्तस्य प्रवृत्तौ स्वकीयप्रवृत्तौ इष्टज्ञानजन्यत्ववत् कार्यताज्ञानजनकत्वमनुमाय शक्तिं निश्चिनोति तादृश पदानाम् । तदनन्तरं 'घटं नय पटमानय' इत्यादिवृद्धव्यवहारतो घटादिपदानामावापोद्वापाभ्यां कार्यान्विते एव शक्तिं निश्चिनोति, ततश्च कार्यतावाचकपदयुक्तस्यैव बोधकत्वं न तु तद्विरहितपदानां बोधकत्वं शक्तेरभावात् । प्रकृते कार्यवाचकपदरहितवेदान्तानां तद्रहितपदरहितत्वेन तादृशपदानां कथं ब्रह्मबोधकत्वम् । अबोधकत्वे च नैरर्थक्यम् । अथवा कार्यबोधकमध्याहृत्योपासनादिषु वेदान्तवाक्यं संप्रयुज्य तस्य सार्थक्यं संपादनीयं न तु तेषां स्वातन्त्र्येण प्रामाणिकत्वमिति पूर्वपक्षिणामाशय इति ॥

यद्यपि ब्रह्म परिनिष्पन्नसिद्धस्वरूपं च तत्र क्रियाजन्यलेशोऽपि न विद्यते तथापि एतादृशब्रह्मस्वरूपं बोधयतामपि "सदेव सौम्ये"-त्यादिवेदान्त वाक्यानां ब्रह्मस्वरूपबोधकत्वं संभवत्येव "उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये" इत्यादि तात्पर्य हेतुसमन्वयात् । अयं भावः पूर्वकार्यार्थव्युत्पत्तिः कारणतया स्वीक्रियते तदनन्तरं जाते बोधे त्यज्यते, कार्यार्थव्युत्पत्तेः कारणता । अत एव 'चैत्र पुत्रस्ते जातः' इत्यादिस्थले वार्ताहारपुरुषवाक्यश्रवणानन्तरं चैत्रस्य मुखविकाशं दृष्ट्वा चैत्रपुत्रजातद्रष्टा बालः चैत्रसुखमनुमिनोति ततश्चैत्रस्य तादृशसुखज्ञानकारणं पुत्रजन्मैव कल्पयति, एवं क्रमेण सिद्धार्थपदेष्वपि व्युत्पत्तिर्भवत्येव । एवं क्रमेण वेदान्तवाक्येष्वपि

पादन किया । उसके बाद जिज्ञास्य ब्रह्म का लक्षण क्या हैं ? एतादृश शंका के निराकरण करने की इच्छासे पदार्थ की सिद्धि लक्षण प्रमाण द्वारा से ही होती है यह बात सर्वानुमत होने से द्वितीय तथा तृतीय अधिकरण से ब्रह्म का लक्षण तथा प्रमाण का भी उपपत्तिपूर्वक प्रतिपादन किया गया है । ब्रह्म में प्रमाण शास्त्र योनित्वाधिकरण में यथावत् प्रतिपादन किया है—ब्रह्म का बोधक प्रमाण

संभवत्येव परिनिष्पन्नब्रह्मबोधकत्वमित्यभिप्रायेणाह वृत्तिकारः "अत्रा भिधीयते" इति, "तत्तु समन्वयादि"-ति सूत्रे योऽयं तु शब्दः स च पूर्व- पक्षव्यावृत्तिपरकः। तत् शब्दो ब्रह्मबोधकः तद् -ब्रह्म शास्त्रप्रमाणकं कुतः समन्वयात् सर्ववेदान्तवाक्यानां तात्पर्यतस्तदर्थस्यैव बोधकत्वादिति सूत्रार्थः। अयमेवार्थः प्रदर्श्यते वृत्तिकारेण 'परिनिष्पन्ने'-त्यादिप्रकर- णेन। यद्यपि परिनिष्पन्नमर्थात् सिद्धस्वरूपं न तु साध्यस्वरूपं ब्रह्म, तस्य ब्रह्मणः "सत्यं ज्ञानमानन्दम्" इत्याद्यनेकश्रुत्या सुखस्वरूपत्वात् तादृशस्य ब्रह्मणः शास्त्रप्रमाणकत्वं संभवत्येव वेदान्तशास्त्रेण "सत्यं ज्ञानमि"-त्यादिवाक्येन परमानन्दस्वरूपस्य, अर्थात् निरतिशयनिरवधिक सुखाकारस्य तस्य प्रतिपाद्यतयाऽन्वयादिति। उपक्रमोपसंहारादिता- त्पर्यग्राहकहेतुभिः सर्वेषामेव वेदान्तवाक्यानां परब्रह्मणि सर्वव्यापक- परमेश्वरस्वरूपे श्रीरामे साकेताधिपतावेवान्वयात्। एवमेव समन्वय प्रकारं दर्शयितुमाह "स चेत्थमि"ति, स च समन्वयप्रकारः इत्थं वक्ष्य- माणप्रकारेण भवतीत्यर्थः। "सदेवेत्यादि" हे सौम्य श्वेतकेतो! इदं परिदृश्यमानं जड़चेतनात्मकं सर्वमपि जगत् अग्रे सृष्टेः पूर्वकाले एकम् एकमेव अद्वितीयं सजातीयद्वितीयरहितं समस्तचिदचिच्छरीरकसद्रूपमेव जड़चेतनस्वरूपकपरमात्मरूपं सदेवासीत्। अर्थात् सृष्टेः पूर्वकाले विभक्तनामकं नाभवत्, अपि तु अविभक्तनामरूपकपरमात्मस्वरूपक- मेवाभवदित्यर्थः। अत्र श्रुतौ यत् सत्पदं तेन सत्पदेन सूक्ष्मचिदचिच्छ- रीरकं सर्वजगत्कारणरूपपरमेश्वरः श्रीराम एव परिगृहीतो भवति।

वेदान्त शास्त्र है यतो वा इमानि भूतानि जायन्ते, सत्यं ज्ञानम् इत्यादि श्रुति का उदाहरण को बतलाते हुए। परन्तु शास्त्र नाम है उसका जो प्रवर्तक अथवा निवर्तक हो, तो यह वेदान्त तो प्रवृत्तिनिवृत्तिरहित परिनिष्पन्न ब्रह्म का अर्थात् सिद्ध पदार्थ का प्रतिपादक है। शास्त्र तो क्रिया का प्रतिपादक है, तब तो इस वेदान्त को ब्रह्म का प्रमाण किस तरह से कहा जा सकता है, इत्यादि

कस्मात् कारणात् एकः सर्वशरीरकः परमात्मैवात्र परिगृह्यतेऽत्र श्रुतौ तत्र कारणं वक्तुमाह वृत्तिकारः "तदेव ब्रह्म" इत्यादि, तदेव समस्त चिदचिच्छरीरकं परब्रह्मैव त्वं विद्धि-जानीहि। "तमेव" इत्यादि तं सर्वं सूक्ष्मस्थूलचिदचिच्छरीरकं परमात्मानं विदित्वा प्रत्यक्षसमानात्मकज्ञानेन विषयीकृत्यैवोपासकोऽतिमृत्युं मोक्षं प्राप्नोति, परमात्मज्ञानव्यतिरिक्तं कारणमयनाय निरतिशयनिरवधिकसुखस्वरूपाय मोक्षाय न भवति अर्थात् परमात्मसाक्षात्कारेणैव मोक्षो जायते न तु तदतिरिक्तेन कारणेन मोक्षो भवतीत्यर्थः श्रुतेः। अनया श्रुत्या अर्थात् इत्यनेकश्रुतिभिः एकस्यैव सर्वजगत्कारणपरमेश्वरस्य भगवतः श्रीरामस्य परिज्ञानादेवातिमृत्युसन्तरणं प्रतिपादितं भवतीति। "नान्यः पन्थाः" अनेन च वाक्येन मोक्षकारणान्तरस्य प्रतिषेध एव सूचितो भवतीति। "यतो वा इमानि" इमानि दृश्यादृश्यसाधारणानि गगनादीनि भूतानि, यस्मात् सर्वशक्तिसमन्वितसर्वज्ञात् परमेश्वरात् समुत्पद्यमानानि भवन्ति, उत्पद्य च यस्मिन् परमात्मनि समवस्थितानि भवन्ति तथा प्रतिसर्गसमये यस्मिन्भगवति महामहिमशालिनि प्रलीयमानानि भवन्ति तमेव परमात्मानं विजिज्ञासस्व एतादृशपरमात्मन एवोपासनां कुरु एतदेव ब्रह्म नान्यद् व्यतिरिक्तं ब्रह्मेति श्रुत्यर्थः। ब्रह्म वा इदमग्र आसीदिति इदं परिदृश्यमानं स्थावरजङ्गमात्मकं स्थूलं जगत् ब्रह्मैव कारणीभूतसूक्ष्मचिदचिच्छरीरकं ब्रह्मस्वरूपमेवासीदिति। "योह वै श्रीरामचन्द्रःस भगवानि"त्यादि यश्चायं भगवान् श्रीरामचन्द्रः साकेताधिपतिः स खलु

प्रकार से आनेवाली अनेक शंकाओं को हृदय में रखकर उन शंकाओं का निराकरण करने के लिए इस चतुर्थ समन्वयाधिकरण का उत्थान करते हुए वृत्तिकार चलते हैं, तत्तु समन्वयादिति। सूत्रस्थ जो तत् शब्द है उसका अर्थ है ब्रह्म और तु शब्द पक्ष का निराकरणपरक है, तब वह जगत्कारण सर्वशक्तियुक्त सर्वेश्वर परमात्मा का प्रतिपादन वेदान्त शास्त्र स्वकीयतात्पर्य के बल से

अद्वैतपरमानन्दः सकलहेयप्रत्यनीकनिरतिशयनिरवधिकपरमानन्दस्वरूपः सर्वेषां स्थावरजङ्गमानाम् आत्मा स्वरूपभूत इत्यर्थः । आनन्दो ब्रह्म परमात्मैवानन्दात्मकः । ब्रह्म वेद ब्रह्मैव भवति । यो हि समुपासकः समस्तजगत आधाररूपेण समस्तस्थूलसूक्ष्मचिदचिच्छरीरकतया परमात्मानं वेद विजानाति तमेव प्रपन्नो भवति स तत्स्वरूपस्तत्सायुज्य मवाप्नोतीत्यर्थः । "रमन्ते योगिनोऽनन्ते" इत्यादि यस्मिन्ननन्ते सर्वकर्तृस्वरूपे नित्यनिरतिशयनिरवधिकानन्दस्वरूपे चिदात्मनि परमात्मनि योगिनो निवृत्तैषणाः परमधामान्वेषिणः पुरुषधौरेयाः परमानन्दमहार्णवे निमग्ना भवन्तीति एतादृशानेक–कल्याणगुणगणविशिष्टो भगवान् परमात्मैव रामपदेनाभिधीयमानः प्रतिपादितो भवतीति रामतापनीयोपनिषदोऽर्थ इति । इत्याद्यनेकाः श्रुतयो भगवन्तं परमात्मानं श्रीराममेव प्रतिपादयन्त्यतस्तादृशराम एव समन्विता भवन्ति तादृशरामस्वरूपगुण विभूतीनां वर्णनमेवाङ्गीकुर्वन्तीति । एवम् "आत्मेत्येवोपासीत" इत्यादि वेदान्ता अपि उपासनाविधिं प्रयुञ्जाना भगवन्तं श्रीराममेव प्रतिपादयन्ति तत्रैव समन्विता भवन्तीति ।

अथ द्वितीयोऽप्यर्थोऽस्य सूत्रस्य तथाहि - "जन्माद्यस्य यतः" अनेन द्वितीयसूत्रेण यत इत्यत्र हेत्वर्थकपञ्चमीविभक्त्या ब्रह्मणि निखिलजगत्कारणत्वं प्रदर्शितम् , केवलं प्रतिज्ञामात्रेण कथितम् न च प्रतिज्ञामात्रे साध्यसाधकम् , तस्मात्तादृशप्रतिज्ञाया उपपादनायै हेतुदर्शनम-

करता है । यह सूत्रार्थ हुआ । अब इसके ऊपर वृत्तिकार संदेह को उपस्थित कर पूर्वपक्ष उत्तरपक्ष द्वारा निर्णय करने के लिए कहते हैं ·तच्छास्त्र-प्रमाणकमित्यादि जिज्ञासा लक्षणप्रमाणद्वारा प्रमाणित जो ब्रह्म है, तादृश ब्रह्ममें शास्त्र प्रमाण संभवित है कि नहीं है ? अर्थात् वेदान्त शास्त्र से ब्रह्म प्रतिपादित होता है अथवा नहीं होता है ? एतादृश संशय होता है । विप्रतिपत्ति के बाद उपस्थित संदेहानन्तर पूर्वपक्ष के स्वरूप का उपस्थित करते हुए वृत्तिकार

ष्यावश्यकमिति हेतुजिज्ञासायां सत्यां हेतुरूपेण प्रकृतं चतुर्थसूत्रमिद-मुपन्यस्तम् "तत्तु समन्वयात्" इति। अत्र समन्वयपदम् व्यतिरेकस्या-प्युपलक्षणम् अन्वयश्च तत्सत्त्वे तत्सत्त्वम् तदभावे तदभावोऽन्वयव्यति-रेकाविमौ कारणताग्राहकौ द्वावपि भवतः। "जन्माद्यस्य यतोऽन्वयादित-रतश्चार्थेष्वभिज्ञः स्वराडि"ति भागवते भगवतो वेदव्यासस्य वचनान्तरात्। तथा चायमर्थः सूत्रस्य भवति, यथा मृत्तिकासत्त्वे घटसत्त्वं मृत्तिकाया अभावे घटो नोपलभ्यते इत्यन्वयव्यतिरेकाभ्यां घटं प्रति कारणत्वं मृत्तिकायाः संपद्यते। एवं प्रकृतेऽप्यन्वयव्यतिरेकाभ्यां जगतोऽभिन्नो-पादानता रामात्मकब्रह्मणि सिध्यति, तथाहि—एतादृशजगत्कारणत्वे ब्रह्मणः कार्यमात्रे पदार्थमात्रे च व्यापकरूपेण समन्वयाद्भवत्येव "पादोऽस्य विश्वा भूतानि" इत्यादिशुक्लयजुर्वेदसंहितया कार्यमात्रं प्रति ब्रह्मणः श्रीरामस्यान्वयः प्रदर्श्यते। तथा "त्रिपादस्यामृतं दिवि" इति शुक्लयजुर्वेदसंहितावाक्येन च तस्यैव रामाख्यब्रह्मणो व्यति-रेकोऽपि प्रज्ञापितः। एवं "स भूमिं सर्वतस्पृत्वे"-ति शुक्लयजुर्वेद वाक्येन तथा "सर्वतः पाणिपादं च सर्वतोऽक्षिशिरोमुखम्। सर्वतः श्रुति-मल्लोके सर्वमावृत्य तिष्ठती"-ति स्मृत्या च सर्वस्मिन्नेव स्थावरजङ्ग-मात्मके जगति ब्रह्मणोऽन्वयः प्रदर्शितः। एवम् "अत्यतिष्ठद्दशाङ्गुलमि"

कहते हैं कि—तत्र शास्त्रस्य प्रवृत्तिनिवृत्ती-त्यादि— शास्त्रमात्र का नियम है कि—वह प्रवृत्ति अथवा निवृत्ति का ही वाचक होता है। ऐसा कहा भी हैं प्रवृत्ति र्वा निवृत्तिर्वा नित्येन कृतकेन वा। पुंसां येनोपदिश्येत तच्छास्त्रमभिधीयते नित्य अथवा जन्य जिसके द्वारा प्रवृत्ति अथवा निवृत्ति उपदिश्यमान हो उसको शास्त्र कहते हैं। इससे फलित यह हुआ कि शास्त्र का प्रयोजन प्रवृत्ति अथवा निवृत्ति कराना ही है, और ब्रह्म तो परिनिष्पन्न सिद्ध वस्तु है इसलिए वह एता दृश ब्रह्म शास्त्रप्रमाणक नहीं हो सकता है, अपितु जो कार्य पदार्थ है वही शास्त्रप्रमाणक है। एतादृश पूर्वपक्ष का अभिप्राय सिद्ध होता है।

-ति शुक्लयजुर्वेदीयवाक्ये''-असङ्गो ह्ययं पुरुष''-इति वाक्ये च तथा "असक्तं सर्वभृच्चैवे''-ति गीतावाक्ये च तस्यैव ब्रह्मणो व्यतिरेकोऽपि निर्धारित एव। एताभ्यां श्रुतिस्मृतिवाक्यप्रतिपादितान्वयव्यतिरेकाभ्यां ब्रह्मणि जगत्कारणत्वं व्यवस्थापितं भवति। एतच्च कारणत्वं न सांख्यवत् केवलमुपादानत्वलक्षणम्। न वा नैयायिकवत् केवलं निमित्तकारणतालक्षणं किन्तु ''प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादि''ति–सूत्रानुमोदितमभिन्ननिमित्तोपादानतालक्षणमेव। ''एतत्सर्वं'' यथा सौम्य एकेन मृत्पिण्डेन विज्ञातेन "इति श्रुतौ तथा ''प्रकृतिश्च प्रतिज्ञे''-ति सूत्रे एवम् "तदनन्यत्वमारम्भणशब्दादिभ्यः "इति सूत्रे च विस्तरेण समर्थितं भविष्यतीति। एतच्च कारणत्वं त्रिवृत्कृतम् त्रिकादिपदार्थानां तत्तदीयघटादिकार्यजाते व्यापकरूपेण समन्वयस्य व्यतिरेकस्य च सर्वत्राव्यभिचरितरूपेण दर्शनेन कारणतानिश्चयो जायमानो दृश्यते। इति यथा दृष्टान्ते दृश्यते तथैव दार्ष्टान्तिकेऽपि सर्वगतत्वात्मकव्यापकतया सर्वजगत्समन्वयेन तद्व्यतिरेकेणैकत्र प्रधानतया समन्वितत्वेन हेतुना सर्वजगत्कारणत्वं ब्रह्मणि समुद्यत एवेति। अथ ब्रह्मणः सर्वत्र विद्यमानत्वेन अन्वयमात्रं भवति, ब्रह्मसत्त्वे कार्यसत्त्वम् न तु व्यतिरेको ब्रह्मणोऽभावे कार्याभावः

एतादृश पूर्वपक्ष के उत्तर में कहते हैं वृत्तिकार अत्राभिधीयते इति अर्थात् यथोक्त पूर्वपक्ष में यह सूत्र तत्तु समन्वयात् होता है जो हित वस्तु का प्रतिपादक होता है, उसको सूत्र कहते हैं। तो यह वेदान्त यद्यपि ब्रह्म परिनिष्पन्नवस्तु है, तथापि नित्यनिरतिशयस्वरूप है तो, एतादृश पदार्थ का प्रतिपादक होता है इस अभिप्राय से कहते हैं वृत्तिकार'' परिनिष्पन्नस्यापी–त्यादि, अर्थात् यद्यपि ब्रह्म परिनिष्पन्न है तथापि तादृश ब्रह्मभी नित्यनिरतिशयसुखात्मक होने से शास्त्रप्रमाणक होते ही हैं, क्योंकि-वेदान्त शास्त्र से परमानन्दस्वरूप ब्रह्म का भी व्याप्य रूप से अन्वय होता है। उपक्रमोपसंहार अभ्यास अपूर्वता फल अर्थवाद उपपत्ति अर्थात्

यतो ब्रह्मणो व्यापकत्वेन तद्व्यतिरेकस्य युक्तेरप्यसंभवादिति चेत्। अत्र प्राचीनाः यथा श्रुतिभिर्ब्रह्मणः प्रपञ्चसमानकमपि रूपं प्रदर्श्यते तथा प्रपञ्चविलक्षणरूपमपि द्विरूपस्य ब्रह्मणः श्रुतौ प्रतिपादनात् तत्र यद्रूपं ब्रह्मणः प्रपञ्चविलक्षणं रूपं यत् जगति नान्वेति तादृशरूपमेव ब्रह्मणोऽन्वयव्यतिरेकज्ञापकमिति कृत्वा समाधानं कुर्वन्ति। परन्तु नेदं तर्कसिद्धं समाधानम् इति तु समाधाने केवलं श्रद्धामात्रग्राह्यं श्रुतिगौरवमात्र साध्यं च। तस्मान्नेदृशो व्यतिरेकः साधीयान् किन्तु, अन्वयव्यतिरेकाभ्यां कारणताया विनिश्चयो भवतीति नियमः सार्वत्रिकप्रायो भवन्नपि यत्र कारणमन्वयव्यतिरेकग्रस्तं भवति तत्रैवान्वयव्यतिरेकौ कारणताग्राहकौ यथा दण्डघटयोः, अत्र दण्डस्य क्वचित्सत्त्वं क्वचिदसत्त्वम् व्याप्यत्वात्, ततोऽत्र दण्डे कारणता अन्वयव्यतिरेकाधीना भवति किन्तु यत्र कारणं व्यापकं व्यतिरेकविरहितम्, न तत्र कारणता तादृशान्वयव्यतिरेकाधीना यथा सुखजीवयोर्यः कार्यकारणभावो न सोऽन्वयव्यतिरेकाधीनः, यतो जीवासत्त्वे सुखासत्त्वमित्याकारकव्यतिरेकस्यासम्भवात्, आत्मा तु व्यापकस्तदभावस्याभावात्। ततश्च सार्वत्रिको नियमः कार्यकारणभावव्यवस्थापकावन्वयव्यतिरेकाविति मन्येत तदा आत्मसुखयोरीशतदीयज्ञानयोश्च कार्यकारणभावः सिद्धो न स्यात्। तस्मात् कारणस्य व्यापकस्थले अन्वयमात्रम् कार्यकारणभावनियामकम् अन्यत्र तु अर्थात् व्याप्यकारणस्थले तदुभावन्वयव्यतिरेकौ तथा भवत इति न्यायानुमतः पन्थाः।

युक्तिलक्षण जो तात्पर्यग्राहक प्रमाण से समस्त वेदान्त का परब्रह्म नित्यनिरतिशयसुखात्मक पकळहेयप्रत्यनीकअनन्तावधिककल्याणगुणाकर श्रीरामचन्द्र साकेताधिपति में निराबाधरूप से समन्वय होता है। अर्थात् सब वेदान्तवाक्य श्रीभगवान् राम का बोधक होता है। वह समन्वय इस प्रकार से समझना चाहिये तथाहि—"सदेव सौम्येदमग्र आसीत" हे सौम्य श्वेतकेतु, यह परिदृश्यमान जड़चेतनात्मक जगत् संसार, अग्रे" उत्पत्ति से पूर्व कालमें

वेदान्तवाक्यानि तात्पर्यतः श्रीरामाख्ये ब्रह्मणि समनुगतानीत्यस्मिन्सूत्रे कथितम् , तत्र द्वित्रा आगमा युक्तयश्च प्रदर्शिताः । अतः परं तेषामेवानेकेषां वाक्यानां स्वरूपं दर्शयित्वा सर्वेषां तात्पर्यावधारणाय तथा स्मृतिपुराणादिवचनानां श्रुत्युपोद्बलकानां प्रदर्शनं कुर्वन् तेषामपि ब्रह्मण्येव तात्पर्यमिति दर्शयितुं श्रुतिसंमतयुक्तिमप्युपदर्शयितुमुपक्रमं कुर्वन्निवाह वृत्तिकारः "अयमत्र निर्णय" इति, अस्मिन् विचारप्रवाह पतितवस्तुतत्त्वे, अयं वक्ष्यमाणो निर्णयः विचारजनितफलप्राप्ति निश्चयः । तथाहि—"भोक्ता भोग्य प्रेरितारं च मत्वा" (संसारसागरान्तः पतितः स्वकृतशुभाशुभकर्मजनितविविधफलविशेषं भुञ्जानो भोक्ता जीवो भोग्यं संसारस्वरूपं तथा तत्र फलभोगकर्मणि प्रेरितारं प्रयोजकं सर्वान्तर्यामिणं परमात्मानम् मत्वा ध्यानविषयतां संपाद्येत्यर्थः„ "पृथगात्मानं प्रेरितारं च मत्वा" (अयमल्पज्ञो जीवः स्वस्मात् पृथग्भूतम् कर्मणि प्रेरकमात्मानं निखिलजगदुपादानकारणभूतं साकेताधिपतिं मत्वा ज्ञात्वा, ध्यात्वेत्यर्थः) अर्थात् योऽयं परमात्मा स जीवविलक्षणो जीवानां स्वकीयकर्मणि प्रेरकश्च, स एव सर्वानेव जीवात् स्वस्वव्यापारे "सत् एक" अद्वितीय सजातीयद्वितीयरहित परमात्मस्वरूप ही था" यहाँ सूक्ष्म चित् अचित् है। शरीर जिसका एतादृश जो ब्रह्म वही सत् शब्द से प्रतिपादित होता है। एवं "तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते" जो चक्षुरादि करणों का करण है अर्थात् चक्षुरादि करणों में रूपादिग्राहकतासामर्थ्य रूप है उसी को ब्रह्म समझो न तु इन सबको ब्रह्म समझो, जिस को उपासना करते है । " तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" उस परमात्मा को जो कि - सकल जगत् का अभिन्न निमित्तोपादान कारण हैं. तादृश परमात्मा को जानकर ही अतिमृत्यु मोक्ष को प्राप्त करता है परमात्मज्ञान से अतिरिक्त—अन्य कोई भी कारण मोक्ष के लिए नहीं है । " इस श्रुति से एक जो परमात्मा जगदुपादानकारण है उसी के ज्ञान से मृत्युसंतरण कहा गया है ।" नान्यः पन्थाः" दूसरा

युनक्ति न तु स्वतन्त्रो जीवः किमपि कर्तुमीश इति बुद्ध्या प्रकल्पयेत्यर्थः। तदेतत्समर्थितमाचार्यसार्वभौमेन श्रीमदनुभवानन्दाचार्येण–आचार्यसम्राट् श्रीश्रुतानन्दाचार्यानुगृहीतश्रौतसिद्धान्तविन्दुस्थं "विकारश्चरामो दयाब्धिस्तथात्वे दयाशून्यतां पक्षपातश्च नैति। प्रकारे विकारस्तथा चित्रसृष्टौ च हेतुर्यतः प्राणिनां प्राच्यकर्म।" इतिमहावाक्यभूतपद्यमुदाहरता। "नित्योऽनित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान्" (मृदोऽब्रवीदापोऽब्रवीदित्यादिश्रुत्या चेतनत्वेनाभिमतानां तयाऽनित्यानां जलादीनामपि नित्योऽविलुप्तसर्वविषयकज्ञानवान् तया नित्यत्वेनाभिमतानामाकाशादीनामपि नित्यः प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगिरूपः उत्पादविनाशरहितः एकः सजातीयद्वितीयरहितोऽपि बहूनां तिर्यङ्मनुष्यदेवादिभेदेन विभिन्नानामनेकेषां जीवराशीनां विभिन्नाननेकान् कमनीयपदार्थान् यः परमात्मा सर्वान्तर्यामिस्वरूपो विदधाति संपादयति, एकः पुरुष एकमपरं पुरुषमुपकरोतीति प्रायो लोकनियमः अयं तु परमात्मा लोकोत्तरलोकोत्तराप्राकृतिकानेकगुणवान् स्वमहिम्ना सर्वजीवानां सर्वानेव कमनीयान् पदार्थान् विदधाति विविच्य सम्यक् सम्पादयतीत्यर्थः। एवंभूतो विलक्षणशक्तिमन्तं परमात्मानं मत्वेति सर्वत्रा-

कोई मार्ग नही है. यह जो श्रुति का अवयव है उससे यह प्रतिपादित होता है कि–परमात्मज्ञानव्यतिरिक्त अन्य किसी भी कारण का निषेध होता है, अर्थात् यदि मोक्ष होता है, तो परमात्मा के ज्ञान से ही होता है, उपायान्तर से नहीं, इस अन्वय व्यतिरेक से परमात्मज्ञान में ही मोक्षकारणत्व व्यवस्थित होता है, अन्यत्र नहीं। (यद्यपि इस वाक्य से तो सिद्ध होता कि-ज्ञान ही मोक्षकारण है, तदतिरिक्त भक्ति प्रभृतिक मोक्षकारण नहीं है तथापि, 'भक्त्या त्वनन्यया लभ्यः" अनन्यभक्तिमात्रसे मैं लभ्य होता हूँ" इत्यादि वचन से दण्डचक्रादि न्याय से यहाँ मोक्षकारणता का ज्ञान में प्रतिपादन किया गया है। एवम् "यतो वा इमानि भूतानि जायन्ते येन जातानि जीवन्ति यत्प्र

नुषञ्जनीयमिति श्रुत्यर्थः। "स कारणं करणाधिपाधिपः" स परमात्मा कारणं सर्वेषां चेतनाचेतनवस्तूनां समुत्पादकः करणानां चक्षुरादीनां योऽधिपः स्वामी तत्तदधिष्ठातृदेवः तेषामपि परमात्मा अधिपो नियन्तेति शेषः। "यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरो यं पृथिवी न वेद यस्य पृथिवी शरीरम्" यः परमात्मा निखिलभूताधिपतिः पृथिव्यां तिष्ठन् पृथिवीमध्ये वर्तमानः पृथिव्या अन्तरो न तु तद्बहिः परन्तु यं परमात्मानं पृथिवी न वेद अयं परमात्मा ममान्तरे एव तिष्ठतीति, एवं रूपेण पृथिवी यं न विजानाति यस्य पृथिवी शरीरं शरीरमिव शरीरम् यः पृथिव्यां वर्तमानः पृथिव्या नियन्त्रणं करोतीति श्रुत्यर्थः। "य आत्मनि तिष्ठन् यस्यात्मा शरीरम्" यः आत्मा सर्वशक्तिमान् परमात्मा आत्मनि विज्ञानमयो जीवे तिष्ठन् वर्तमानः यस्य परमात्मनोऽयं जीवः शरीरम्" एवं क्रमेण सर्वश्रुतीनां यथासंप्रदायमर्थो ज्ञातव्याः। इत्यादिश्रुतयः" उपर्युक्ता इमाः श्रुतयः।" चिदचिदीश्वरस्वरूपाणि" तत्र चित्-चेतनवान् जीवोऽचित् चेतनागुणरहितो जड़स्वभावकः पृथिव्यादिपदार्थः ईश्वरः सर्वस्य शासको जगदाधारः, तत्र चित्पदार्थो द्विविधः स्थूलः सूक्ष्मश्च, सूक्ष्मः स्थूलश्चेति जडोऽपि द्विविधः परमात्मा तु सर्वविलक्ष-यन्त्यभिसंविशन्ति तद्विजिज्ञासस्व तद् ब्रह्म" यह जड़ चेतन संपूर्ण जगत् सर्ग के आदि में जिस महान् परमात्मा से उत्पन्न होता है, एवं उत्पन्न होकर जिस परमात्मा में अवस्थित रहता है, और प्रतिसर्ग (प्रलय) के समय में लीयमान हो जाता है उस परमात्मा को तूं भी जिज्ञासा करो, अर्थात् भक्तिप्रवृत्ति के द्वारा ही उसको जानो, वही ब्रह्म है।" ब्रह्म वा इदमग्र आसीन्नान्यत्किंचनमिषत्" यह परिदृश्यमान जड़ चेतन जगत् सृष्टि के पूर्व काल में ब्रह्मरूप ही था अन्य कुछ नहीं था।" "यो ह वै श्री रामचन्द्रः स भगवान अद्वैतपरमानन्द स्वरूप परमात्मा है।" "आनन्दो ब्रह्म" ब्रह्म परमानन्दस्वरूप है ब्रह्म

णोऽपि सर्वतादात्म्यं भजमानः सर्वानतिशेत इति। इत्येवं तेषां चिदचित् परमेश्वराणां यानि स्वरूपाणि तानि अस्य प्रतिपाद्येतिल्यबन्तक्रिययाऽनुपदं वक्ष्यमाणया सह संवन्धः, ततश्चैताः श्रुतयश्चिदचित् परमेश्वराणां रूपाणि प्रतिपादयन्तीत्यर्थः। "भोक्तृभोग्यनियन्तृतया पृथगुपवर्ण्य" इति तत्र भोक्ता जीवः भोग्यश्च जडपदार्थः, नियन्ता परमेश्वरः। एतेषां स्वस्वरूपं पार्थक्येनोपवर्ण्येति पूर्वेणान्वयः। तथा अचिद्वस्तुनः पृथिवीगगनादेः स्वरूपेण पणिामो भवति, चित्पदार्थस्यापि ज्ञानस्य संकोचविकाशाभ्यां परिणामो जायते न तु स्वरूपतः पृथिव्यादिवदित्यपि वर्णयित्वा नियन्तुः परमेश्वरस्य जडचेतनवत् न स्वरूपपरिणामो न वा जीववत् ज्ञानसंकोचविकाशात्मको वा परिणामो जायते, अपि तु परमेश्वरः सर्वदा सर्वपरिणामरहित इत्याकारकपरिणामराहित्यं भवतीति प्रतिपाद्य प्रतिपादनं कृत्वा, योऽयं जडचेतनपदार्थः स च परमात्मनः शरीरलक्षण इत्यपि ज्ञापयित्वा, ततश्च ब्रह्म परमात्मा चेतनावेद ब्रह्मैव भवति" ब्रह्म परमात्मा को तत्त्वरूपसे जानता है वह ब्रह्म स्वरूप हो जाता है अर्थात साकेताधिपति के सारूप्य को प्राप्त कर जाता है। एवम् रमन्ते योगिनोऽनन्ते नित्यानन्दे चिदात्मनि" इति रामपदेनासौ परं ब्रह्माभिधीयते योगीलोग जिस अनन्त (अन्तरहित प्रागभावप्रध्वंसाभावरहित) नित्यानन्द चिदात्मामें रमण करते हैं वही यह भगवान् श्रीरामचन्द्र जी ब्रह्म शब्द के वाच्य हैं।" इत्यादि पूर्व उदाहृत श्रुतिसमुदाय भगवान् श्रीरामचन्द्र परमात्मा का स्वरूप गुण विभूतियों का वर्णनपूर्वक भगवान् श्रीरामचन्द्र में हीं समन्वित होते है। अर्थात् तादृश भगवान् श्रीरामचन्द्र का ही प्रतिपादन करते हैं, और आत्मेत्पेवोपासीत" आत्मा अर्थात् परमात्मा भगवान् श्रीरामचन्द्र ही उपासनीय हैं. इत्यादि उपासनाविधि का प्रतिपादन जो कियाा गया है, उससे भी यह सिद्ध होता है कि — सब वेदान्त भगवान् का ही प्रतिपादक है।

चेतनपदार्थयोः स्वरूपभूत आत्मस्वरूपतया जडचेतनयोरन्तर्यामी परमात्मा इति प्रतिपादयन्ति ताः श्रुतयस्तथा परमात्मा अनवद्यः सकल हेय-प्रत्यनीकोऽनवधिककल्याणगुणको नित्यः त्रिकालेऽपि सर्वथा बाध-विवर्जितः सर्वदैकरूपेण ऽजवस्थितो लीलामात्रेण संसारचक्रं परिभ्राम-यन् भक्तानुग्रहाय केवलं धृतशरीरो लोकप्रत्यक्षयोग्योऽपि भवतीति प्रतिपादयन्तीत्येताः श्रुतयोऽहर्निशमिति । एवं च सर्गस्य पूर्वकाले नाम रूपविभागायोग्यं यत् चिदचिद् वस्तु, तदेव शरीरं यस्य एतादृशः परमात्मा जडचेतनसकलप्रपञ्चस्याभिन्ननिमित्तोपादानकारणं भवति, न केवलं रूपतो भगवान् जगतः कारणमपि तु सूक्ष्मचिदचिद्भ्यां समन्वित एव कारणं भवति । तत्रापि न केवलं कुलालादिवत् कर्ता न वा कपाला-दिवदुपादानं किन्तु लूताकीटवत् स्वयमेव विशेषणांशं पुरस्कृत्योपादान कारणं पुरस्कृत्य च विशेष्यांशं च तत्वतया निमित्ते कर्ता कारको भवन्

इस प्रकरण का क्या तात्पर्य है ? इस बात को बतलाने के लिए वृत्तिकार कहते है -" अयमत्र निर्णय" इति, इस प्रकरण का यह निर्णय है कि-" पृथगात्मानं प्रेरितारं च मत्वा" यह जीवात्मा अपने से भिम्न उस आत्मा अर्थात परमात्मा को जान कर तथा वह परमात्मा सबका प्रेरयिता है, इस बात को जानकर "ईश्वरः सर्वभूतानां हृद्देशेऽर्जुन तिष्ठति" हे अर्जुन, परमात्मा भगवान् सबके हृदय में विराजमान होकर सबको प्रेरयिना होकर सबको प्रेरणा देनेवाले हैं, तथा" केनापि देवेन हृदिस्थितेन यथा नियुक्तोऽस्मि तथा करोमि" कोई एक देव विशेष जो मेरे हृदय में अव-स्थित है उनकी प्रेरणा से मैं कार्य करता हूँ, इत्यादि अनेक स्मृति, पुराण वचनों से भगवान् को सर्वनियन्ता को प्रेरयिता समझकर एवम् भोक्ता भोग्य प्रेरितारं च मत्वा" भोक्ता अर्थात् जीवात्मा भोग्य जड़ादिक पदार्थ को तथा प्रेरयिता परमात्मा को जानकर "नित्यो नित्यानां चेतनश्चेतनानामेको बहूनां यो विदधाति कामान् नित्यत्वेन अभि-

कारणतां भजते। एतादृशं कारणमेवाभिन्ननिमित्तोपादानमिति कथ्यते। इविज्ञायिष्यति च श्रुतिं पुरतः कृत्वा प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधादिति सूत्रे भगवानानन्द भाष्यकारोऽमुमेवार्थं तत्सूत्रीयभाष्ये तत एव द्रष्टव्यम् ।"

एवं तदेव ब्रह्म यदा नामरूपविभाग्यं भवति स्थूलचिदचिद्वस्तु तदा कार्यमपि भवति अर्थात् एकमेव जगतः कारणमपि भवति तथा कार्यमपि भवति, एतावानेव विशेषो यत् सूक्ष्मचिदचिद्विशिष्टं तदा तु कारणम्, यदा च स्थूल-चिदचिद्विशिष्टं भवति तदा कार्यम्, एवं च सविशेषणे हीति न्यायेन कारणत्वकार्यत्वधर्मौ विशेषणे भवतः, ब्रह्मणि तु वैशिष्ट्यमात्रेणोभावपि धर्मौ ब्रह्मसंबन्धिनौ भवत इत्यभिप्रायेण ब्रह्मण एव कारणत्वं कार्यत्वं चेति बोधायनसिद्धान्तः। एतादृशं च ब्रह्मणः स्वरूपं न कपोलकल्पितमेव, सामानाधिकरण्यद्वारा "सर्वं खल्विदं ब्रह्म" ऐतदात्म्यमिदं सर्वं(ग.६।८।७)-मित्यादिश्रुतिभिरेव स्वयं प्रतिपादितत्वादाचार्यपरम्परासिद्धत्वाच्च। ये तु श्रुतिसिद्धान्तप्रतिकूलास्ते तु सर्वथा असन्त एवेति ॥

मत जो आकाशादिकपदार्थ उन सबकी अपेक्षा से नित्य अर्थात् आकाशादिक पदार्थ जगत् में नित्यरूप से प्रसिद्ध हैं, परन्तु परमात्मा तो तदपेक्षया भी नित्य हैं, अर्थात् आकाशादिक में जो नित्यता है, सो आप्रलयान्तावस्थायित्वरूप चिरस्थेमलक्षण है, और परमात्मा में जो नित्यता है सो अनपेक्ष सार्वदिक नित्यता है, इसी नित्यता को अन्यलोग त्रिकालाबाध्यत्व कहते हैं और चेतनत्वेन अभिमत जो जीव उनका भी जो चेतन है, अर्थात् जीव की जो चेतना उसका संपादक जो है, तथा वह परमात्मा एक होकर सजातीयद्वितीयरहित होने से सहायक व्यक्त्यन्तरानपेक्ष होकर भी अनेको उपासकों का अनेक प्रकारक कमनीय वस्तु को जो बनाने वाले तथा देनेवाले हैं।" स कारणं करणाधिपाधिपः' परमात्मा संपूर्ण

अथ यदि जीवात्मनोर्भेदः स्वीक्रियते स्वरूपतः स्वभावेन च तदा एकस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवतीति प्रतिज्ञा कथं संगता स्यात् यतो यदि मृत्तिका घटयोरभेदस्तदैव मृदो ज्ञाने जाते तदभिन्नो घटोऽपि विज्ञातो भवति, न तु सुवर्णे ज्ञाते मार्दो घटो विज्ञातो भवति, तथैव यदि जीवपरमात्मानौ परस्परमभिन्नौ कार्यकारणाभ्यां धर्मौ भवेतां तदैवैक विज्ञानेन सर्वविज्ञानप्रतिज्ञा समर्थिता भवेत् न तु जीवेश्वरयोर्भेदे इयं प्रतिज्ञा समर्थिता स्यादिति पूर्वपक्षिणामाशयमभिव्यञ्जयन्नाह वृत्तिकारः "न चैवं जीवपरयोरित्यादि" जीवपरयोर्जीवात्मपरमात्मनोर्यदि स्वरूपेण स्वभावेन च परस्परं भेदः समर्थितः "सर्वं खल्वित्यादि"-श्रुत्या तदा एकविज्ञानेन सर्वधिज्ञानप्रतिज्ञा या वेदान्ते विद्यते तस्याः समर्थनं कथं स्यात् न हि घटे विज्ञाते पटो विज्ञातो भवतोति पूर्वपक्षः। यथा जलदुग्धयोः स्वभावस्वरूपाभ्यां परस्परं विभिन्नयोरपि दुग्धपात्रपतितजलस्यदुग्धज्ञानेन ज्ञानं जातमेव भवति, तथैव प्रकृतेऽपि

जगत् का कारण है, और करण जो चक्षुरादिक आम्यन्तर तथा बाह्यकरण दण्डादिक, उसका अधिप स्वामी जीव उसका भी अधिप पालयिता प्रेरयिता है, "यः पृथिव्यां तिष्ठन्" जो पृथिवी के अभ्यन्तरमें रहता है। फिर भो पृथ्वी से अन्तर है जिसको पृथ्वी नहीं जान सकती है, जिस परमात्मा का पृथ्वो शरीर है, अर्थात पृथ्वी एक अवयव है।" य आत्मनि तिष्ठन्" यस्यात्मा शरीरम्" जो परमात्मा जीव में रहता, जिसका जीव शरीर है अर्थात् अवयव है। परमात्मा का अवयव है जड़ तथा चेतन, उसमें आकाशादिभेद से अनेक प्रकारका है, एवं नारकदेवमनुष्यादिभेद से जीव भी अनेक प्रकारके है, तथापि जीवत्वेन सकल जीव का एकरूप से संग्रह होता है तथा जड़त्वरूप से सकल जड़का संग्रह होता है। और ईश्वरत्वरूप से दोनों जड़ जीव का एकरूप से संग्रह होता है। यही विशिष्टाद्वैतवाद का स्तम्भ है।

कथं न स्यात् किं च नात्यन्तिको भेदो जीवपरयोः परस्परं कार्यकारण भावस्यापि स्वीकारोऽस्त्वित्याशयेन पूर्वपक्षस्य समाधानं कुर्वन्नाह वृत्तिकारः 'जीवेऽवस्थान्तरापत्तिरि'–त्यादि जीवस्य परिणामित्वेन पूर्वदोषस्याभावात्, तथाहि–जीव एकां देवाद्यवस्थां परित्यज्य कर्मवशान्मनुष्याद्यवस्थां भजमानः प्राप्नोत्येव परिणामं परिणामवत्त्वात्, तथा ब्रह्मणः कार्यत्वाच्च यथा मृत्तिकायाः कार्यं घटादि, तथैव परमेश्वरकार्यं च जीवराशिरपीति स्वीकारेण सर्वविज्ञानप्रतिज्ञायाः समर्थनसंभवात्। यद्यपि सर्वज्ञत्वाल्पज्ञत्वधर्माभ्यां परजीवयोर्भेदोऽपि चेतनावत्त्वधर्मेण तदुभयोरेकत्वस्यापि संभवात्। तथा जीवो न सर्वथा स्वतन्त्रोऽपि परमेश्वराधीनत्वेन तत्कार्योऽपि ॥

न चैवं यदि जीवस्य परमेश्वरकार्यत्वं मन्येत, तदा जीवो विनश्यति भावकार्यत्वादित्याद्यनुमानेन तस्य जीवस्य विनाशित्वं स्यात्, ततो बन्ध

इत्यादिश्रुतय" इत्यादि वृत्तिः" पृथगात्मानं प्रेरितारं च" यहाँ से लेकर" य आत्मनि तिष्ठन्" एतत्पर्यन्त श्रुति तथा स्मृतिपुराणादि वाक्य-समुदाय चित् जीवात्मा' अचित् जड़राशि, वह भी सूक्ष्म स्थूल भेद से दो प्रकारका है। इनका तथा ईश्वर सर्वनियन्ता का जो स्वरूप है उन सब का प्रतिपादन करते हैं। भोक्ता जीव भोग्य जडराशि और परमेश्वर के पृथक् पृदक् रूपसे उपवर्ण्य प्रतिपादन करके अचिद्वस्तु जड़ का स्वरूपतः परिणाम होता है। चिद्वस्तु का परिणाम स्वरूपतः नहीं होता है, किन्तु ज्ञान का संकोचविकाशरूप परिणाम होता है, अर्थात् जीव स्वरूपतः परिणामी नहीं है, किन्तु जब कीटपतंगादियोनि को प्राप्त करता है तब ज्ञानमात्र अल्प होता है। और जब मनुष्यदेवादियोनि को प्राप्त करता है, तब उसकी ज्ञान मात्रा अधिक होती है। उस रूप से ज्ञान संकोच और विकाश को प्राप्त करता हुआ परिणत होता है, और सर्वनियन्ता जो परमेश्वर सो उभय

मोक्षव्यवस्था कथमुपपादिता स्यात् कथं वा मनुष्यादिदेहकृतसुकृतदुष्कृतयोः फलं शरीरान्तरे भोक्ष्यते जन्यत्वेन विनाशित्वादित्याक्षेपकस्याशयं हृदि समाधाय समाधते वृत्तिकारः इयांस्तु विशेष इत्यादि संभवेत् त्वदीय आक्षेपो यदि जडवत् जीवस्यापि परिणामः स्वीक्रियेत, परन्तु यथा जडपदार्थः स्वरूपेण परिणतो भवति पूर्वावस्थां परित्यज्योत्तरामवस्थां भजमानः, किन्तु जीवे ज्ञानस्य संकोचविकाशात्मक एव परिणामो भवति। यथा गृहे वर्तमानस्य प्रदीपस्य प्रभा गृहव्यापिनी भवति, घटमध्यस्थितस्य प्रदीपस्य प्रभा तु घटमात्रव्यापिनी भवति, तदत्र प्रदीपेन भवति विलक्षणता, एवं जीवोऽपि यदा कीटपतङ्गादिशरीरमधितिष्ठति, तदा तदीयं ज्ञानं स्वल्पमिवाभाति, यदा च स एव मनुष्यदेवादिशरीरमाश्रित्यावतिष्ठते तदा तदीयं प्रतिबन्धकरहितं सत् अति-

प्रकारकपरिणामरहित है, उसका प्रतिपादन कर और चित् अचित् यह दोनों पदार्थ ब्रह्म परमात्मा का शरीर अर्थात् अवयव है। कार्य तदा कारण में तादात्म्य होता है, उस नियम से ब्रह्म को चिदचिदात्मक होने से चिदचित् का परमेश्वर अन्तर्यामी हैं एवं ब्रह्मस्वरूप नित्य है, सर्वदोषरहित है, उन सब वस्तु को पूर्वोक्त श्रुतिजाल प्रतिपदन करता है। ऐसा ब्रह्म ही कारण हैं, और कार्य भी है। सृष्टि के पूर्व काल में नामरूपविभागरहित सूक्ष्मचिदचिच्छरीरक जो ब्रह्म वह संपूर्ण जगत् का कारण है। और तब वही ब्रह्म नामरूपविभागयोग्य जो स्थूलचित् पदार्थ, उस से युक्त जो ब्रह्म है। सो कार्यपरिभाषा को प्राप्त करता हैं। यद्यपि एक ही पदार्थ कार्य होगा तथा कारण होता है, यह तो अनुभवविरुद्ध तथा युक्तिसंगत नहीं होता है, क्योंकि अव्यवहितपूर्वकालवृत्ति को कारण कहते हैं, और अव्यवहितोत्तरकाल वृत्ति को कार्य कहते हैं, तो एक ही पदार्थ तत्पूर्वकालावच्छिन्न होगा तथा तदनवच्छिन्न होगा सो असंभवित है, तथापि यद्रूपविशिष्ट ब्रह्म में कारणता है तद्रूपविशिष्ट में कार्यता नहीं है, कार्यतावच्छेदक तथा कारण

विस्तीर्णमिव भवति। एवं क्रमेण जीवीयज्ञानस्य संकोचविकाशमात्रं भवति. इति जीवधर्मस्य ज्ञानस्य संकोचविकाशलक्षणपरिणामेन ज्ञान धर्मिणो जीवस्यापि कथंचित् जायमान इव भवति न तु सर्वथा स्वरूपान्तरापत्तिलक्षणपरिणामो भवति जीवस्य । यथा घटावच्छिन्नस्य नभसो घटविनाशे विनाशो घटस्योत्पादे चोत्पाद इति व्यवहारो भवति न तावता आकाशस्योत्पादो न वा विनाशस्तथैव प्रकृते जीवधर्मस्य ज्ञानस्यैव संकोचविकाशौ भवतो न तु जीवस्य परिणामो भवति। अन्यथा जीवस्य स्वरूपान्यथाभावलक्षणपरिणामस्वीकारे "अजो नित्यः शाश्वतः" इत्यादिवाक्यानां का गतिः स्यादिति। एतदेव दर्शयति श्रुतिमुदाहरन्मूत्तिकारः "न जायते म्रियते" इत्यादि, अयं विपश्चित्

तावच्छेदक धर्म के भिन्न होने से एक में कार्यकारणभाव होता है। जैसेः- सर्पः स्वात्मना स्वात्मानं वेष्टयति" सर्प अपने से अपने को वेष्टित कर लेता है" यहाँ वेष्टन क्रिया :के प्रति वही सर्प कर्ता भी है, और करण भी है, कर्म भी होता है तो कर्तृत्वकरणत्वकर्मत्वप्रयोजक धर्म भिन्न रहता है । इसी प्रकार से यद्रूपविशिष्ट ब्रह्म में कारणता है, तद्रूपविशि में कार्यता नहीं है, किन्तु सूक्ष्मचिदचिद्विशिष्ट में कारणता है, और स्थूलविशिष्ट में कार्यता है तो कार्यतावच्छेदक कारणतावच्छेदक धर्म को भिन्न होने से एक में भी कार्यकारणभाव होता है। जैसे एक ही द्रव्यता जाति सत्ता की अपेक्षा से अपर है और पृथिवीत्वादिकी अपेक्षा से पर है, उसीप्रकार से वही ब्रह्म जब सूक्ष्मचिदचिद्विशिष्ट होता है तब कारणशब्द से व्यवह्रियमाण होता है सृष्टि के पूर्वकाल में, तथा सर्ग-काल में स्थूलचिदचिद्विशिष्ट होकर कार्य कहलाता है तो इस प्रकार से एक ही ब्रह्म कार्य भी कारण भी कहलाता है।, जैसे एक ही व्यक्ति अध्यापनक्रियाकाल में अध्यापकपदबोध्य होता है। तद्वत् प्रकृत में भी समझना चाहिये । परंतु इतना समझना चाहिए कि—"सविशेषणेन" इसन्याय से कार्यत्व कारणत्व स्थूल सूक्ष्म विशेषणांश

ज्ञानवान्, न जायते घटादिजडवस्तुवत् कदाचिदपि कारकव्यापारेण समुत्पद्यमानो न भवति, यथा घटो दण्डचक्रकुलालादिकारकसमुदायेन न जायते, तथाऽयं जीवोऽपि नोत्पादकसमवायिकारणादेरभावात् समवाय्यसमवायिनिमित्तकारणैः कार्याणि जायमानानि भवन्तीति नियमः, परन्तु प्रकृते समानजातीयस्य कस्य चिज्जीवसमवायिकारणस्यानिर्वचनात् नोत्पाद्यते जीव इति । ननु अजायमानोऽपि प्रागभावो यथा घटे जाते विनष्टो भवति, तथाऽजायमानो जीवः कुतश्चित् कारणवशात्कदाचिद्विनष्टो भविष्यति । न चेष्टापत्तिः, जीवस्य विनाशित्वे में ही है विशेष्यांश में नहीं है, क्योंकि ब्रह्म एक है तथापि उभयसंन्धित होने के कारण से विशेष्यांश में भी कार्यत्वकारणत्व का उपचारमात्र ही होता है।

"एतादृक्स्वरूपमित्यादिवृत्तिः" एतादृशविलक्षण ब्रह्म के स्वरूप का सामानाधिकरण्यद्वारा सर्वं खल्विदं ब्रह्म" ये परिदृश्यमान सब पदार्थ ब्रह्मस्वरूप हैं, इत्यादि श्रुतिके द्वारा प्रतिपादन किया गया है । अर्थात् अर्थ कुछ कपोलकल्पित नहीं है किन्तु श्रुतिप्रतिपादित है ।।

प्रश्न-यदि जीव और परमेश्वर स्वरूप तथा स्वभाव से यदि अत्यन्त भिन्न है तथा नित्य है, तब तो वेदान्त में प्रसिद्ध जो एकविज्ञान से सर्वविज्ञान की प्रतिज्ञा हैं उसका उपपादन किस प्रकार से होगा । अर्थात् यदि जीव ब्रह्मस्वरूप होता तब ब्रह्मविज्ञान से ब्रह्माभिन्न जीव भी ज्ञात होता । जैसे मृत्तिका के ज्ञान होने से मृदभिन्न घट का ज्ञान होता है । यहाँ तो आपने ब्रह्म जीव में भेद मान लिया, तब ब्रह्मविज्ञान से ब्रह्मभिन्न जीव का तो ज्ञान नहीं होगा, और एकविज्ञान से सर्वविज्ञान की प्रतीज्ञा समर्थितो नहीं होगी । क्या घट के विज्ञान से घटभिन्नपदार्थ विज्ञात होता है ? समाधान—यद्यपि स्वरूप तथा स्वभाव से जीवेश्वरमें भेद प्रतिभासित होता है, तथापि जीव परिणामो है, इसमें अवस्थान्तर को प्राप्त करने का स्वभाव

मोक्षाभावप्रसङ्गात् इत्थं च पूर्वयुक्त्या जीवस्य विनाशित्वेनेष्टसिद्धि-रित्याशङ्कां निवारयितुं श्रुतिराह "न म्रियते" अथं विपश्चिज्जीवः प्राग-भाववद्धटवद्वा विनाशात्मकमरणक्रियामपि नानुभवति, तथात्वे जन्मा-न्तरानुभूतवस्तुनः स्मरणादीनां व्यक्तिविशेषे दर्शनेन तदनुपपत्तिप्रसङ्गात् एवं गीतादिवचनान्यपि जीवस्य नित्यताप्रतिपादकानि । एवं सूत्रका-रोऽपि जीवस्य नित्यतामेव प्रतिपादयति । अतो जीवस्य स्वरूपेऽन्यथा-भावो न भवति केवलं जीवधर्मज्ञानस्य संकोचविकाशावेव भवतः । अतो न कोऽपि श्रुतिविरोधो न वाऽनुभवतर्कादिविरोधो वा भवतीति । संप्रति प्रकरणार्थमुपसंहरन्नाह वृत्तिकारः—"इत्थं च परस्ये"—त्यादि, इत्थं च यथोक्तप्रकारेण परस्परनिखिलचेतनाचेतनजगदुपादानस्य सर्वशक्तिमतः सर्वेश्वरस्य हेयप्रत्यनीकनित्यनिरतिशयाप्राकृतगुणगणाकरस्य भगवतः

है, और वह जीव में परिणाम हैं, सो परमकारण से उत्पन्न होता है तो तादृशपरिणामविशिष्ट जीव भी ब्रह्म का कार्य कहलाता है। अतः कारण जो ब्रह्म है, उसके ज्ञान होने पर कार्यरूप जो जीव है उसका भी ज्ञान हो जाने से एक विज्ञान से सब विज्ञान की प्रतिज्ञा का बाधरूप दोष नहीं होता है। यदि इस प्रकार से जीव को जन्म होने से अनित्यत्व होता है, तो स्वर्ग मोक्षादि व्यवस्था का बाध होता है, और कोई भी दार्शनिक विचार वाले व्यक्ति जीव को अनित्य नहीं मानते हैं।" एवं श्रुति तथा सूत्र में जीव की उत्पत्ति का निराकरण किया है, सो तो जीव को जन्य-मानने से वह व्यवस्था अस्तव्यस्त हो जायेगी। इस शंका का निराकरण करने के लिए वृत्तिकार कहते हैं कि— इयांस्तु विशेष इत्यादि। जीव को जन्यता मे इतनी विशेषता है कि - जिस प्रकार जड पदार्थ स्वरूप से परिणाम को प्राप्त करता है, अर्थात् पूर्व जो आकार उसको सर्वथा परित्याग कर- अभूतपूर्व अपर आकार को प्राप्त कर जाता है किन्तु जीव में एतादृशस्वरूपपरिणाम नहीं होता है, अर्थात धर्मी के अंश में परिणाम नहीं

श्रीरामचन्द्रस्य ब्रह्मणः स्वरूपं स्वरूपविभूतिलीलादिकम् तथा तादृशस्य भगवतः प्राप्तेरुपायं भक्तिप्रपत्त्यादिकम् अभिदधत् प्रतिपादयत् वेदान्तशास्त्रं तस्मिन् सकलतन्त्रस्वतन्त्रे सर्वात्मनि श्रीराम एव कल्प्येत संपूर्णरूपेण समन्वेति समन्वयं प्राप्नोति। तदेव वेदान्तशास्त्रस्य शास्त्रत्वं यत् श्रीमति भगवति श्रीरामे समन्वयं प्राप्नोतीति संक्षेपः ॥

इति समन्वयाधिकरणम् ।

इति जगद्गुरु–श्रीरामानन्दाचार्य– रामप्रपन्नाचार्य–योगीन्द्रकृतस्य श्रीरघुवरीय–वृत्तिविवरणस्य चतुर्थंसमन्वयाधिकरणम् ॥ ४ ॥

इति चतुर्थसूत्रवृत्तेर्विवरणम्

होता है, किन्तु जीव का जो धर्म है ज्ञान तदंश में फेरफार हो जाता है जब वह जीव जघन्य योनि को प्राप्त करता है, तब उस का ज्ञान संकुचित हो जाता, और वही जब देव-मनुष्यादि–शरीर को प्राप्त करता है तब उसमें ज्ञान का विकाश हो जाता है। इसलिए वृत्तिकार ने कहा है – अचेतन के समान जीव में स्वरूप-परिणाम नहीं होता है अपितु ज्ञान के संकोच-विकाश रूप अन्यथाभावलक्षण परिणाम होता है जो कि–धर्मस्थित परिणाम है न तु धर्मी जीवका परिणाम है। अतएव "न जायते म्रियते वा" इत्यादि–श्रुति जीव के स्वरूप के अन्यथाभावलक्षणपरिणामात्मक उत्पत्ति का निवारण करती है, न तु धर्मांश में होनेवाला संकोचविकाशलक्षणपरिणाम का निराकरण करती है। एतावता ही जीव में नित्यता का समर्थन होता है। इस प्रकार से परब्रह्म के स्वरूप को तथा ब्रह्मप्राप्ति के उपाय का प्रतिपादन करता हुआ शास्त्र संपूर्णरूप से ब्रह्म में ही समन्वित होता है, अर्थात् यह शास्त्र ब्रह्मका प्रतिपादक है, यह सिद्ध हुआ ॥ ४ ॥ इति समन्वयाधिकरणम् । समाप्ता च चतुःसूत्री ॥४॥

॥ अथेक्षत्यधिकरणं पञ्चमम् ॥

ईक्षतेर्नाशब्दम् ॥१।१।५॥

(रघुवरीय-वृत्तिः)

अनया च ब्रह्ममीमांसया समन्वयाविरोधसाधनफलाख्यैश्चतुर्भिरध्यायैः परमपुरुषार्थावाप्तयेऽखिलहेयप्रत्यनीकानन्त-कल्याणगुणाकरस्य प्राप्यस्य ब्रह्मणः श्रीरामस्य स्वरूपं मोक्षो-पायो मोक्षाख्यं फलञ्चाभिधीयते (तत्र चतुःसूत्र्या वेदान्तशास्त्रानारभ्यत्वशङ्कामपाकृत्य ब्रह्मणो जिज्ञा-

---

योगिनः परमानन्दवोधलक्षणलक्षितम् ।
यमाश्लिष्यन्ति सर्वज्ञं तं वन्दे रघुनन्दनम् ॥१॥
विहाय कार्यतावोधं सिद्धे ब्रह्मणि मानना ।
पुरुषार्थस्वरूपे च वेदान्तानां प्रसाधिता ॥२॥

"अथातो ब्रह्म जिज्ञासे" ति प्रथमसूत्रेण ब्रह्मजिज्ञासां प्रतिज्ञाय, "जन्माद्यस्य यत" इति सूत्रेण प्रतिज्ञातब्रह्मणो लक्षणाशङ्कां निराकृत्य;

सारबोधिनी— सर्व प्रथम ब्रह्मजिज्ञासा का कथन कर चतुर्थ सूत्र से सब वेदान्त वाक्यों का ब्रह्म में ही समन्वय का प्रतिपादन करते हुए चतुः सूत्री के प्रतिपादन द्वारा सब वस्तु को वतलाया। जो कुछ भी पदार्थ यहाँ प्रतिपादित हुआ है, उसी वस्तु को प्रमाण तथा सद्युक्ति के द्वारा विस्तार पूर्वक चार अध्यायवाला प्रकृत इस शास्त्र में प्रतिपादन करेंगे। प्रतिपादनीय पदार्थ का लक्षण प्रमाण का प्रतिपादन प्रथमतः होना चाहिये तथा परमत का निराकरण भी होना चाहिये, अन्यथा जवतक परमत का निराकरण नहीं हो जाता है, तवतक स्वाभिमतप्रस्तुत की सिद्धि नहीं होगी। अतः प्रतिपादनीय विषय के विचार से पहिले परमतका निराकरण करने के लिए यहाँ समन्वय--विरोध का परिहार—साधक प्रमाण और फल को एक एक अध्याय करेंगे। उसमें प्राथमिक समन्वयाध्याय में चार पाद से समस्त वेदान्त को चिद-

सनलक्षणे तत्र प्रमाणं तत्रैव च समेषां वेदान्तानां समन्वय इति दर्शितम्। इदानीमवशिष्टेनादिमपादेन जगत्कारणत्वं ब्रह्मण एव सम्भवति न त्वन्यस्येति विचार्यते। तत्रानेनेक्षत्यधिकरणेन सांख्याभिमतप्रधानस्य जगत्कारणत्वं न सम्भवतीत्येतदुच्यते। अत्र "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्' तदैक्षत बहु स्याम्प्रजायेय" (छा० ६।२।१।३) इत्यादिकारणवाक्ये सत्पदवाच्यं प्रधानं भवितुमर्हति नवेति संशयः।

तृतीयसूत्रेण "शास्त्रयोनित्वादि"–त्यनेन तस्मिन् ब्रह्मणि शास्त्रप्रमाणकत्वमभिधाय, "तत्तु समन्वयादि"–त्यन्तसूत्रसमुदाये सर्वज्ञसर्वशक्तिमति जगदुत्पत्तिस्थितिनाशकारणे ब्रह्मणि वेदान्तानां समन्वयोऽपि प्रदर्शितः। तत्र परमार्थतो ब्रह्मणि जगत्कारणता प्रदर्शिता। ननु ब्रह्मण्येव कारणता प्रदर्शिता, तादृशकारणता तु तदन्यस्मिन्नपि संभवति। तत्र सन्देहो जायते यत् जगतः स्थावरजङ्गमस्य कारणता चेतनेऽचेतने वा? तत्र चिच्छरारक ब्रह्मस्वरूप के प्रतिपादन में तात्पर्यहै, यह कहेंगे तथा स्पष्ट ब्रह्मस्वरूप के प्रतिपादन में तात्पर्य है, यह कहेंगे तथा स्पष्ट ब्रह्मलिंगक वाक्यों का विचार कर जगत् का कारण रूप से सर्वज्ञत्व सर्वशक्तिमत्स्वरूप से सगुण ब्रह्म ही वेदान्तवेद्य है इस बात को व्यवस्थित करेंगे उसी सगुण ब्रह्म का लक्षण तथा प्रमाणादि के द्वारा विवेचन पूर्वक समर्थन किया गया है। प्रकृतमें जगत्कारणत्व जो ब्रह्म का लक्षण किया गया है, सो ठीक नहीं है, क्योंकि–जगत् का कारणरूपता तो प्रधान परमाण्वादिक में भी संभावित है? एतादृश पूर्व पक्ष का खण्डन करने के लिए पंचम सूत्र का उपक्रम वृत्तिकार करते हैं–"अनया च ब्रह्ममीमांसया" इत्यादि, इस ब्रह्ममीमांसा ब्रह्मविचारशास्त्र से समन्वयाध्याय अविरोधाध्याय साधनाध्याय और फलाध्यायनामक चार अध्यायों से परमपुरुषार्थलक्षणफल को प्राप्ति के लिए अखिलः समस्त जो हेय गुण उसका विरोधि जो अनन्त कल्याण गुण अर्थात् संख्यातीतगुणनिकर का आकर समुद्र स्वरूप जो कि स्वभावतः प्रत्येक प्राणियों से प्राप्त-

तत्र त्रिगुणत्वेन परिणामित्वेन च प्रधानस्यैव जगत्कारणत्वं न त्व परिणामिनो ब्रह्मण इत्यत्र वाक्ये सत्पदवाच्यं प्रधानमेवेति पूर्वः पक्षः। अत्राभिधीयते—एतच्छ्रुतिवाक्यं न प्रधानमभिधत्ते। यतस्तत्र सङ्कल्पार्थकस्येक्षति-पदस्य श्रवणात्। सङ्कल्पश्च चेतनस्य धर्मो न तु जडस्य प्रधानस्येति ॥५॥

विशेषकारणस्याभावे वादिनां विप्रतिपत्तेः सन्देहो जायते। तत्र प्रधानस्याचेतनस्यानुमानसिद्धस्यैव जगदुपादानकारणतां समर्पयन्ति वेदान्ता इति सांख्याः। तत्र जीवव्यतिरिक्तपरमेश्वरात्मकचेतनेनाधिष्ठिताः पृथिवीजलतेजोवायवीयाः परमाणवो जगदुपादानमिति काणादाः। अभाव एव निखिलजगदुपादानकारणमिति बौद्धाः। स्वभाव एव सर्वस्योपादानमिति स्वभाववादिनः। काल एव सर्वोपादानमिति कालवादिनः। अनिर्वचनीयानाद्यविद्यया शक्तिमच्चेतनं जगदुपादानमिति केचन।

ध्य है, एतादृश पर ब्रह्म भगवान् श्री रामजी का स्वरूप—मोक्ष, मोक्ष का उपाय तथा मोक्षाख्य फल का भी कथन करेंगे। उसमें सबसे पहिले चतुःसूत्रों से वेदान्तशास्त्र की अनारम्भ्यत्व की जो शंका, उस शंका का निराकरण करके ब्रह्मकी जिज्ञासा ब्रह्मका जगदुपादानादिलक्षणकारणत्व ब्रह्म में प्रमाण और संपूर्णवेदान्तवाक्यों का ब्रह्ममें ही समन्वय होता है, इन सब बातों को बतलाया गया है। अवशिष्ट प्रथम पाद से ब्रह्म में जगत्करणत्व हो सकता है, अथवा नहीं हो सकता है, इत्यादिरूप से विचार किया जाता है। अर्थात् अवशिष्ट प्रथम पाद से जगत् जो स्थावरजंगमात्मक है, तादृश जगत्कार्य के प्रति कारणता जोकि अभिन्नोपादानता लक्षण है तादृश कारणता तो ब्रह्म में ही है, न तु प्रधानादिक में जो कोई भी जगत्कारणता प्रधान में मानते हैं, सो भी तो तादृशकारणतापरिणाम्युपादनता मात्र मानते हैं, और जो जीव को कारण मानते हैं, वे भी केवल निमित्त

सगुणं ब्रह्म श्रीसीताधिपतिरेव स्थावरजङ्गमात्मकजगत उपादानकारणमिति वेदान्तरहस्यवेदिनो श्रीबोधायन-रामानन्दीयमतावलम्बिनः। तदेवमनेकप्रकारकविप्रत्तिपत्त्या संशये सति तत्र न ब्रह्मणि नोपादानता संभवति ज्ञानक्रियाशक्तिरहितत्वात्, तथा ब्रह्मणोऽपरिणामित्वादेकरूपवत्त्वाच्च त्रिगुणात्मके परिणामिनि प्रधाने तादृशशक्तेः संभवात्। यद्यपि साम्यावस्थायां प्रधानेऽपि ज्ञानक्रियादयो न भवन्ति तथापि अव्यक्तेन शक्त्यात्मना संभवत्येव तत्। तथा च प्रधानमेव सांख्यैरनुमानकल्पितं सर्वज्ञं सर्वशक्तिसमन्वितं च न तु ब्रह्म, यद्यपि ब्रह्मणि स्वरूपचैतन्यं भवति, तथापि तत्स्वरूपचैतन्यं जीववदनुपयोग्येव। न च स्वरूपचैतन्ये कर्तृत्वं, तस्याकार्यत्वात् कार्यत्वे तु सर्वदा न सर्वज्ञता, कार्यत्वस्याकस्मिकत्वात्। भोगापवर्गलक्षणपुरुषार्थद्वयप्रयुक्तानादिप्रधानपुरुषसंयोगनिमित्तमहदहंकारादिक्रमेण चेतनस्यापि चेतनेनानधिष्ठितस्यापि प्रधा-

कारणता की ही शंका करते हैं; किन्तु अभिन्ननिमित्तोपादानता तो नहीं है, अचेतन तथा अल्पज्ञ होने से इन सब बातों का विचार होता है। उसमें भी इस ईक्षत्यधिकरण से प्रधान को जो कि—सांख्यमतकल्पित सत्त्वरजस्तमोलक्षण गुण का केवल साम्यावस्थारूप है। तादृशप्रधान को जगद्रूप कार्य के प्रति कारणता नहीं हो सकती है. इस बात का विचार करते हैं। यहाँ "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" तदैक्षत बहु स्यां प्रजायेयेति" हे सोम्य श्वेतकेतु! यह परिदृश्यमान सूक्ष्म स्थूल स्थावर जंङ्गम जगत् सृष्टि के पूर्व में सजातीय द्वितीयरहित एक अद्वितीय सत्स्वरूप परमात्मा तादात्म्यापन्न था। जैसे फलितपुष्पितवृक्षनिकर अभिव्यक्ति अवस्था के पूर्वकाल में बीज के साथ ही तादात्म्यापन्न रहता है, बीज से भिन्न रूप में नहीं देखने में आता है, तद्वत्—उस सदात्मककारण ने जो कि चेतनातिरिक्त नहीं है उसने ईक्षणात्मक संकल्प किया कि—एक मैं अनेक रूप से अभिव्यक्त होऊं। यह जो जगत् के प्रति कारणताबोधक वाक्य है उस

नस्य प्रतिक्षणपरिणामिनः प्रधानस्य संभवत्येव परिणामरूपः सर्गः। अचेतनमपि वस्तु चेतनेनानधिष्ठितमपि पुरुषार्थसंपादनाय प्रवर्तमानं भवतीति दृश्यते, यथा वत्सविवृद्धयर्थमचेतनमपि क्षीरादिकं प्रवर्तते। तथा "तदैक्षत बहु स्यामि"-त्याद्यागमोऽपि अचेतनेऽपि चेतनवदुपचारात् स्वकार्योन्मुखतामादर्शयति। तथा "ता आप ऐक्षन्त तत्तेज ऐक्षत" इत्यादि वचनमप्यौपचारिकमेव। "अनेन जीवेनात्मनाऽनुप्रविश्य" इत्यत्रापि जीवात्मत्वं जीवार्थकारितया प्रधानस्य सांख्यपरिकल्पितस्यैव कथनं करोति। एवं 'तत्वमसी'-त्यागमोऽप्यौपचारिक उपासनापरको वा। एवं स्वमपीतो भवतीति श्रुतिरपि जीवस्य स्वकीये प्रधाने सुषुप्तावस्थायामप्ययं दर्शयति, यतः प्रधानावयवतमोगुणस्योदये जीवो निद्राणस्तमसीव निमग्नो भवति, तदुक्तम्—"अभावप्रत्ययालम्बना वृत्तिर्निद्रे"-ति। एवं सर्वज्ञं प्रक्रम्य श्वेताश्वतरमन्त्रेऽपि "स कारणं करणाधिपाधिपः" इत्या-

वाक्य में सद्वाच्य ब्रह्म नहीं है, किन्तु प्रधान ही सत्पदवाच्य है, एतादृश सन्देह वादिप्रतिपत्ति के द्वारा उपस्थित होता है। अर्थात् प्रकृत ब्रह्म में कारणता बोधक है?, अथवा सांख्याभिमत प्रधान में कारणता का बोधक है?।

एतादृश संशय में पूर्वपक्ष होता है कि—प्रधान त्रिगुण है, तथा परिणामी है, इसलिये प्रधान को ही जगत् के प्रति कारणता है, न तु स्वरूपतः परिणामरहित ब्रह्म में कारणता है। अतः कारणवाक्यघटकसत्पद का वाच्य प्रधान ही है यह पूर्वपक्ष होता है। यहाँ पूर्वपक्ष का अभिप्राय यह होता है कि—स्वतन्त्र रूपसे सांख्यशास्त्र में प्रतिपादितगुणत्रययुक्त प्रधान में ही जगत्कारणत्व युक्त है, किन्तु ब्रह्म में नहीं। क्योंकि ब्रह्म तो किसी भी जन्य धर्म का आश्रय नहीं होने से अपरिणामी है। प्रधान तो अचेतन है, परिणामी नित्य है, और एक है। "सदेव सौम्येदमग्र" इस श्रौतकारणवाक्य में इदम् पद से प्रसिद्ध अचेतन त्रिगुणात्मक कार्यसमुदाय का निर्देश कर उसी को स्थूलअवस्थारहित को सद्रूपत्व का प्रतिपादन किया गया है सदासीत् पद

दिकः प्रधानाभिप्राय एव । प्रधानस्य पूर्वयुक्त्या सर्वज्ञत्वं सर्वज्ञानवत्त्वरूपं प्रतिपादितम् । तस्मादचेतनं प्रधानमेव सर्वजगत उपादानम्, न तु परमाणवोऽभावादि न वा चेतनं ब्रह्म, तस्य गुणक्रियादिधर्मैः स्वरूपेण वाऽपरिणामित्वादित्यादिपूर्वपक्षं मनसि निधाय तदपाकरणाय वैयासिकिः पञ्चमसूत्रमवतारयति । 'ईक्षतेर्नाशब्दमिति । अशब्दमर्थात् अनुमानोपनीतं सांख्यैः प्रकल्पितं स्वकीयपरिभाषया परिभाषितं सत्त्वरजस्तमसां साम्यावस्थात्मकं प्रधानं न जगतः स्थावरजङ्गमात्मकस्योपादानकारणम् कुतः ? ईक्षतेः 'तदैक्षते'-ति श्रुतौ ईक्षति -धातोः श्रवणात् अर्थात् स एव जगतः कारणं यस्मिन् ईक्षतिः संकल्पो विद्यते स च संकल्पवान् भगवान् सर्वेश्वर श्रीसाकेताधिपतिरेव स एव कारणं न तु प्रधानं कारणं यतः स चेतनस्तस्मिन् ईक्षणात्मकसंभवात् प्रधानस्य तु चेतनाराहित्येन तदसंभवात् । अर्थात् 'सदेव सौम्येदमग्र आसीत् तदैक्षत बहु स्यां प्रजायेय'—इत्यादि से और उस एक कारणरूप प्रधान के विज्ञान से प्रधान का कार्यरूप समस्त जगत् का विज्ञान होता है, यह जो आगे कहा जाएगा, उसका भी सामञ्जस्य घटता है । अत एव अन्यत्र अजामेकां लोहितशुक्लकृष्णां बह्वीः प्रजाजनयन्तीं सरूपाः" इत्यादि रूप से स्पष्ट ही प्रधान को ही जगत् का उपादान कारणता का प्रतिपादन किया है । उस में सत्वगुण के अंश से शुक्ल सुखमय प्रजा, रजोंश से लोहित प्रजा, और तमोगुणांश से कृष्ण प्रजा को पैदा करती है, यह अर्थ होता है श्वेताश्वतरीयवाक्य का । प्रकृतिशब्दवाच्य वह प्रधान सर्ग के प्रारंभ काल में महदहंकारादिक्रम से परिणत होता है, उसी को चतुर्विंशतितत्त्वात्मक कहते हैं । ईश्वरकृष्ण ने भी कहा है "मूलप्रकृतिरविकृतिर्महदाद्याः प्रकृतिविकृतयः सप्त षोडकस्तु विकारो न प्रकृतिर्न विकृतिः पुरुषः ।" प्रधान को जगत्-कारणता मानने पर रजोगुण तथा सत्त्व गुण के योग से क्रियाशक्ति तथा ज्ञानशक्ति भी होती है । क्योंकि—ज्ञान जो है, सो सत्त्व गुण का धर्म है । "सत्वात्संजायते ज्ञानम्" सत्त्वगुण से

सृष्टिवाक्येषु जगत्कर्तृकृतस्येक्षणस्य संकल्पापरनामकस्य श्रवणेन चेतनात्मककर्तृकत्वमेवेक्षणस्यानुभवसिद्धत्वेन चेतनलक्षणस्य ब्रह्मण एव जगदुत्पत्त्यादिकं प्रति कारणत्वं स्थितं भवति न त्वचेतनस्य प्रधानस्य जगत्प्रति कारणत्वं स्वातन्त्र्येण भवति परमपुरुषपराधीनतया तु तस्य प्रधानस्य सहकारिकारणत्वं भवत्येव। तदधीनत्वादर्थवदिति "अस्मान्मायी सृजते विश्वमेतदि"–त्यादिसूत्रश्रुतिस्थानन्दभाष्यानुसरणात् प्रधानस्य चेतनभिन्नस्य कारणत्वं भवत्येवेति सूत्रार्थः ॥

तदेतत्सर्वं संक्षेपविस्तरमावेदयितुं वृत्तिकार उपक्रमते "अनया च ब्रह्ममीमांसया" इत्यादि इदं च ब्रह्मविचारशास्त्रं निरतिशयसुखलक्षणफलोपदेशकत्वेन शास्त्रपदप्रतिपाद्यं भवति॥ शास्त्रत्वं हितशासनादिति। तदेव शास्त्रं समन्वयाविरोधसाधनफलाख्येनाध्यायचतुष्टयेन विभक्तम्। तत्र प्रथमेऽध्याये चत्वारः पादाः एवं, द्वितीये तृतीये चतुर्थेऽपि, तत्र प्रथमे पुनः सर्ववेदान्तवाक्यानां स्पष्टास्पष्टब्रह्मलिङ्गकानां चेतने परमकारणे समन्वयो दर्शितः। द्वितीयेऽध्याये मतान्तरविरोधः परिहृतो भविष्यति। तृतीये तु प्राप्यस्य साकेताधिपतेः प्राप्तिमार्गः प्रतिपादयिष्यते, चतुर्थे

ज्ञान समुत्पन्न होता है, ऐसा भगवान् का वाक्य है। "सत्वाद्रजस्तमस्सी-अभिभूय प्रवृद्धसत्वगुणाज्ज्ञानेन्द्रियेषु विशदं ज्ञानं सञ्जायते" (रजोगुण तथा तमोगुण को दवाकर प्रवृद्ध सत्व गुण से ज्ञानेन्द्रियोंमें विशद ज्ञान उत्पन्न होता है) इस गीतावाक्य की अर्थचन्द्रिकानामक विशदार्थगर्भकटीका में महामहोपाध्यायजगद्विजयी जगद्गुरु श्रीरामानन्दाचार्य श्रीरघुवराचार्यने उक्त विवरण लिखा है, विस्तारपूर्वक वहीं द्रष्टव्य है। यह जो सत्त्व गुण है प्रधानावस्थामें भी वर्तमान है, इसलिए अचेतन भी प्रधान को सर्व सत्त्वसर्वशक्तिमत्त्व उत्पन्न होता है। सत्व गुण स्वयं यद्यपि क्रियारहित होने से प्रकाशस्वरूपज्ञानात्मकवृत्ति का उत्पादक नहीं होता, तथापि चलायमान रजोगुण के संबंध से ज्ञानोत्पादक होता है और तमोगुण आवरक तथा

तादृशसाधनेन कीदृशं फलं भवतीति विचारयिष्यतीति। एभिश्चतुर्भिरध्यायैः प्रकरणविशेषैः पुरुषार्थप्राप्तये नित्यनिरतिशयपरमानन्दलक्षणमोक्षात्मकफललाभाय समस्तहेयगुणानां प्रत्यनीकाः, अर्थात् प्रकृतिजनितदुःखसाधनानां विरोधिनो येऽनन्ताः संख्यातीताः कल्याणगुणास्तेषामाकरस्य समुद्रसदृशस्य भक्तप्रपन्नैः प्राप्तुं योग्यस्य ब्रह्मणः श्रीसाकेता-धिपतेर्भगवतो रामचन्द्रस्य यत् स्वेतरविभिन्नमप्राकृतिकसर्वान्तर्यामिस्वरुपम्, तथा मोक्षस्य प्रापकमर्चिरादिमार्गविशेषः तथा प्राकृतिकबन्धनविवर्जितं सायुज्यादिलक्षणान्यतमात्मकमोक्षफलं चोच्यमानं भवतीति। तत्रापि चतुः सूत्र्यन्तप्रकरणेन वेदान्तशास्त्रस्याऽऽरम्भः कर्तव्यो नवेति संशयानन्तरं पूर्वोत्तरपक्षाभ्यां वेदान्तशास्त्रस्यारभ्यत्वम् तथा प्रथमसूत्रेण ब्रह्मणो जिज्ञास्यत्वम्, द्वितीयसूत्रेण जिज्ञास्यस्य ब्रह्मणो लक्षणदोषराहित्येन लक्षणं दर्शयित्वा, तृतीयसूत्रेण ब्रह्मणि वेदान्तशास्त्रस्य प्रामाण्यमुपदर्श्य चतुर्थसूत्रेणाकार्यपरकाणामपि वेदान्तानां सिद्धस्वरूपे परब्रह्मणि समन्वय आक्षेपप्रतिक्षेपाभ्यां समाहितः। इतः परं पञ्चमसूत्रादारभ्येदमीयादिपदान्तप्रकरणेन ब्रह्मण एव चेतनस्य

गुरुरूप होने से सत्त्वगुण तथा रजोगुण को किसी स्थल में प्रवृत्त कराता हुआ किसी स्थल में निवृत्त कराता हुआ नियमित करता है। यह प्रवृत्त्यादिककार्यद्वारा अनुमित होता है, और ब्रह्म में तो सत्त्वादिक कोई भी धर्म नहीं रहता है। इसलिए ब्रह्म में क्रियाशक्तिज्ञानशक्तिमत्त्व नहीं है, न वा जगत् की सृष्टि संहार शक्ति ही हो सकती है। और प्रधान में तो तीनों प्रकार का गुण है, इसलिए ज्ञानक्रियाशक्तिमत् होने से जगत्सृष्टिस्थितिविनाशकर्तृत्व होने में कोई विरोध नहीं होता है। अत एव "प्रकृतेः क्रियमाणानि गुणैः कर्माणि सर्वशः" इस वाक्य में स्पष्टरूप से कहा है। इसलिए प्रकृत में सर्वज्ञ सर्व शक्तिमत् प्रधान ही सर्व जगत् का कारण है, और इसी प्रधान का बोधक सदेवेत्यादिक वाक्य है।' यह हुआ पूर्वपक्षवादी का अभिप्राय ॥

सूक्ष्मस्थूलजीवाजीवमपञ्चजालस्य कारणत्वं, न तु तदतिरिक्तस्याचेतनस्य प्रधानादिपरमाणुस्वभावादेरिति विचारयिष्यति।

तत्रापि पञ्चमसूत्रादारभ्य द्वादशसूत्रान्तात्मकेक्षत्यधिकरणेनानुमानिकसांख्यमतप्रतिपादितसत्त्वरजस्तमसां साम्यावस्थालक्षणप्रतिक्षणपरिणतशीलाऽव्यक्ताऽपरनामकप्रधानस्य जगत्कारणत्वं चेतनत्वादिस्यादिविचारं सपरिकरं करोतीति। अन्तः विचारणीयपञ्चमाधिकरणे "सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयम्" (हे सौम्य श्वेतकेतो ? इदं नामरूपाभ्यां विभक्तं जड़चेतनात्मकं जगत् अग्रे स्वोत्पत्तेः पूर्वकाले सदेवासीत्, सदात्मकब्रह्मस्वरूपमेवाभवत्, तच्च सदेकं-सजातीयद्वितीयरहितं चाभवत् ब्रह्मतादात्म्यापन्नमेवाभवन्न तु कार्याकारेण विभक्तमिवाभवदिति श्रुत्यर्थः "तदैक्षत बहु स्यां प्रजायेय"। तत् कारणावस्थं चेतनमैक्षत' विचारं संकल्पं कृतवान् यद-हमेकोऽपि बहु अनेको भवेयम्, अर्थात् अपरित्यजन् एव कारणात्मकतां कार्याकारेण

इस पूर्वपक्ष को निराकरण करने के लिए वृत्ति कार अहते हैं—"अत्राभिधीयते" इत्यादि "सदेव सौम्ये"त्यादि श्रुतिवाक्य प्रधान में कारणता का प्रतिपादन नहीं करता है, क्योंकि—"तदैक्षत" इत्यादिस्थल में ईक्षतिपद का श्रवण है। संकल्प तो चेतन का धर्म है, न तु जड़ात्मकप्रधानादिक का धर्म। अयंभावः, अनुमानगम्य सांख्याभिमत जो प्रधान सत्त्वादिगुणों का समुदायात्मक है, वह "सदेव सौम्येदम" इस वाक्य में सत्पदवाच्य नहीं है। अत एव वह प्रधान जगत् का कारण नहीं हो सकता हैं, क्योंकि—"तदैक्षत" इस श्रुति में ईक्षति पद का प्रयोग है, ब्रह्म चेतन है उसमें संकल्प संभवित होने से वही कारण है,प्रधान अचेतन में संकल्प तो सर्वथा असंभवित है। अर्थात् "सदेव सौम्येदमग्र आसीत्" यहाँ से लेकर "तदपोऽसृजत" एतत्पर्यन्त सृष्टिवाक्य में जो जगत् का कारण है उसमें ईक्षणात्मकधर्मका

परिणतो भवेयमिति श्रुत्यवयवार्थः)। यदस्मिन् कारणवाक्ये सदिति पदं दृश्यते तत् चेतने एव कारणतां समर्पयति, यद्वा प्रधाने कारणतां समर्पयतीति वादिविप्रतिपत्तेः संशयो जायते। तदनन्तरम् यत् परिणामि तदेव परिणमते यथा क्षीरं परिणतं सदेव दधि भवति, इह तु चेतनं ब्रह्म न परिणामि तस्य कथमिव जगत् परिणामलक्षणं भवेत् स्वरूपतो ब्रह्मणोऽपरिणामित्वस्य स्वीकारात्। प्रधानन्तु स्वरूपगुणाभ्यां परिणामि इति तदेव जगतः कारणं स्यात्, तदेव चेह कारणश्रुतौ सत्पदेन संगृहीतं भवति, न तु चेतनम्। यद्यपि कारणान्तरवाक्ये सर्वज्ञत्वमपि कारणे श्रुतमस्ति, तच्च सर्वविषयकज्ञानवत्त्वात्मकसार्वज्ञ्यं तु प्रधाने नास्ति, तस्य जडत्वात् परमपुरुषस्य तु चेतनतया सार्वज्ञ्यं संभवतीति चेतनमेवोपादानं नाचेतनं प्रधानमिति। तथापि ज्ञानं तु सत्त्वगुणात्मकम् "सत्वात्संजायते ज्ञानमि"-ति स्मृतेः। सत्वगुणस्य च प्रधानसंबन्धित्वात् तेन रूपेण कथंचित् प्रधानेऽपि तत्संभवादिति पूर्वपक्षाशयः॥ एतादृशं पूर्वपक्षाशयं

श्रवण है, और ईक्षण तो चेतनात्मककर्तृक है। इसलिए चेतन रूप जो ब्रह्म है, वही जगत् का स्वतंत्र कारण है, जड़ात्मकप्रधान स्वातंत्र्येण जगत् का कारण कथमपि नहीं हो सकता है, परन्तु ब्रह्मात्मक रूप से तथा ब्रह्म के अधीन होकर परसुखार्थेक्षितरूप से आंशिक रूप से वह भी कथंचित् कारण होता ही है। अतएव "तदधीनत्वादर्थवत्" १।४।३ ब्रह्मसूत्रमें एवं "अस्मान्मायी सृजते विश्वमेतत्" इस श्रुति में ब्रह्म के अधीन होकर प्रधान को जीवव्यतिरिक्तजगत् के प्रति आंशिक कारणत्व का प्रतिपादन किया है। ऐसा हुआ तब अचेतन प्रधानको अचेतनांश जगत् के प्रति कारणत्व होने पर भी चेतनाचेतनसाधारणसूक्ष्मस्थूलसाधारण सकलजगत् के प्रति तो कारणता नहीं है। ब्रह्म तो स्वरूपतः एवं तेजःप्रभृति सकल जगत् का कारण है, क्योंकि सूक्ष्म चिदचिद्विशिष्ट है, इसलिये और "अस्मान्मायी" इत्याद्यनेक श्रुति के अनुरोध से सत्पदवाच्य ब्रह्म आत्म-

मनसि समाधाय तदुत्तरयितुमाह "अत्राभिधीयते" इति "सदेव सौम्य" इत्यादिकारण-वाक्यस्थं सत्पदं न प्रधानस्य वाचकमपितु चेतनस्यैव वाचकं यतः कारणवाक्ये संकल्पार्थकेक्षतिपदस्य श्रवणात् संकल्पो हि चेतनस्य धर्मो भवति, नहि भवति कदाचिदपि प्रतीति-र्यद् घटः संकल्पयति, तस्मात् संकल्पधर्मपरिगृहीतं चेतनमेव कारणं न तु जडात्मकं प्रधानं जगतः कारणमिति । यद्यप्यचेतनेऽपि नद्याः कूलं पिपत्सति या तुमिच्छतीत्यादिस्थले औपचारिकः प्रयोगस्तथापि मुख्यार्थसंभवे गौणी कल्पना गौण्येव भवतीति । सूत्रार्थस्तु इत्थम्-अशब्दम् आनुमानिकं प्रधानं सांख्यपरिकल्पितं न कारणं कुतः ईक्षतेः कारणवाक्ये सङ्कल्पार्थकेक्षतिपदश्रवणात्, संकल्पश्च चेतनस्य धर्मो भवति, नतु सर्वथा जडस्येति सदेवेत्यादिसत्पदवाच्यं चेतनं परमात्मैव कारणम्, न तु तदतिरिक्तं प्रधानमितिदिक्, विस्तरस्तु श्रीरामानन्दाचार्यभाष्यतोऽवगन्तव्यः ॥५॥

शब्दादिवाच्य परमात्मा ही प्रधानद्वारा सकल जगत् का उत्पादक होता है। उसमें भी जलादि सृष्टि में तथा अवान्तरसृष्टि में स्व में सूक्ष्मरूप से अव्याकृतनामरूपद्वारा अवस्थित सभी पदार्थों का व्याकृतनामरूपात्मक सृष्टि को करते हैं। ऐसा हुआ तब अचेतनमात्र को प्रधानकार्य होने से विकारित्व होने से विकारित्वादि दोष प्रधान में ही पर्यवसित होता है, ब्रह्म तो सर्वथा निर्विकार ही है, ऐसा सिद्ध होता है। इस विषय को आचार्य प्रवरश्रीश्रुतानन्दाचार्यजी ने श्रौतसिद्धान्तबिन्दु में "विकारश्च रामो दयाब्धिस्तथात्वे" इत्यादिप्रबन्ध में किया है विशेषार्थियों को वहीं से अवगत करना चाहिये इत्यादि उत्तरपक्ष का आशय है। इस विषय के सम्बन्ध में विस्ताररूप से विचार आनन्दभाष्यादि सांप्रदायिकग्रंथ तथा आचार्यपरंपरा से जानना चाहिये। मैं ने केवल वृत्तिग्रंथ के अक्षरार्थाशय को प्रदर्शित करने का प्रयत्न किया है ॥५॥

गौणश्चेन्नात्मशब्दात्।१।१।६।

ननु 'तत्तेज ऐक्षत' "ता आप ऐक्षन्त" (छा० ६।२।३।) इतीक्षण व्यपदेशवदचेतने प्रधानेऽपीक्षण व्यपदेशो गौण एव स्यादिति चेन्न, 'एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो (छा ६।८।७।) इत्युत्तरत्र सच्छब्दाभिहितस्यैवात्मशब्देन व्यपदेशात् । एतदनुरोधेन 'तत्तेज ऐक्षत' इत्यादावपि तेजशरीरकस्य परमात्मन एव ग्रहणम् ।६।

विवरणम्-अथानुमानिकस्य प्रधानस्य जगतः कारणत्वं न संभवति, यतः कारणे ईक्षितृत्वधर्मस्य श्रवणात् तादृशं चेक्षणवत्त्वमचेतनस्यन संभवतीत्यतश्चेतनः परमात्मैव जगतः कारणमिति 'ईक्षते र्ना शब्द' मिति पञ्चमसूत्रेण प्रतिपादितम् । तत्र मृतप्रायस्याखो गौमयाघ्राणेन पुन रुज्जीवनवत् पुनः सांख्यवादी शङ्कते, नायमभ्युपगमः सम्यक्, यतःकारणे श्रूयमाणमीक्षितृत्वं गौणं न तु मुख्यम्, यथा नदीकूलस्य प्रत्यासन्नता मालक्ष्यकूलं पिपतिषतीति अचेतनेऽपि कूले पतनेच्छावत्त्वं गौणमारोपितं भवति, तथैव सदेवेत्यादि वाक्ये सङ्कल्पोऽपि प्रत्यासन्नकार्योन्मुखे प्रधाने एव गौणः सङ्कल्पः। श्रुतावपि मृदब्रवीदित्यादि स्थले तथा प्रयोगो दृश्यते। एतादृश पूर्वपक्षिणामाशयमाकलय्य तन्मतनिरासाय षष्ठसूत्रमवतारयितुमाह वृत्तिकारः—ननु तत्तेज ऐक्षत इत्यादि । तत्तेज

सारबोधिनी—पंचमसूत्र में कहा गया कि-प्रधान जगत्का कारण नहीं हो सकता है क्योंकि कारणमें ईक्षण धर्मका श्रवण है । ईक्षण चेतन का धर्म है और वह अचेतन प्रधान में संभवित नहीं है, इत्यादि युक्तिओं से प्रधानमें जगत् कारणता का निराकरण किया गया । परन्तु ईक्षण मात्रसे चेतन में कारणत्व सिद्ध नहीं हो सकता । तथा हि—तत्तेज ऐक्षत ता आप ऐक्षन्त (उस तेज ने ईक्षण संकल्प किया उन जलने संकल्प किया) इत्यादि स्थल में अचेतन जल तेज में ईक्षण धर्म का श्रवण हो रहा है । उसी प्रकरण के समान इस प्रकरण में एवं उसके साहचर्य से "सदेव सौम्येदम्"

ऐक्षत ता आप ऐक्षन्त:,, तत्पूर्वोक्तं तेजः अर्थात्तेज शरीरक ब्रह्म ऐक्षत ईक्षणं सङ्कल्पमकरोत् तथा आपो जलानि ऐक्षन्त समकल्पयन् इत्यादि स्थले अचेतने तेजः प्रभृतिषु पदार्थेषु गौणमीक्षणं भवति तद्वत् अचेतनमपि प्रधानं तथापि तादृशाचेतने सत्पद बोध्ये गौणमेवेक्षणं संभविष्यति। ततश्च सङ्कल्प बलेन यत् कारणवाक्ये परमात्मग्रहणं भवति, तन्न युक्तम् अपि तु गौणमीक्षणमादाय प्रधानमपि जगतः कारणं संभवत्येवेति पूर्वपक्षः। तन्निराकरणायाह वृत्तिकारः—इति चेन्नेत्यादि। एतत् परिदृश्यमानं जडचेतनात्मकं जगत् ऐतदात्म्यम् परमेश्वरस्य रूपमेव हे श्वेतकेतो! तत् सर्वकारणं परमात्मा जड़चेतनशरीरकः सत्यः परमार्थतः सत्यः तथा स परमात्मैव आत्मा सर्वेषामात्मभूतः त्वमपि तादृश एव सर्वशरीरक परमात्माश्रृत एवेत्यादि छान्दोग्यीयाग्रिमप्रकरणे सदेवसौम्येत्यादि कारणवाक्यघटक सत्पदेनप्रतिपादितस्य वस्तुनः कथनात् तदनुरोधात् तत्तेज ऐक्षत इत्यादि वाक्येऽपि तेजः शरीरकस्य परमात्मन एव ग्रहणात्। अर्थात् आत्मशब्दो हि चेतनस्य वाचको न तु अचेतनस्य वाचकः। चेतन श्च श्वेतकेतुः तादृश चेतनस्य आत्मा परमात्मैव सत्पद वाच्यो न तु तदात्मकं प्रधानं संभवति अतः समान प्रकरणे वर्तमानः परमात्मैव

यहाँ भी जो सत् में ईक्षण है वह गौण है। अतः सत्पद बोध्य सांख्यकल्पित अचेतन प्रधान में भी ईक्षित्व की उपपत्ति हो सकती है, तब प्रधान को ही जगत् कारण मानना समुचित है। एतादृश आशंका का निराकरण करनेके लिये सूत्र के उत्थान पूर्वक पूर्वपक्ष को वृत्तिकार बतलाते हैं "ननु तत्तेज ऐक्षत इत्यादि" "तत्तेज ऐक्षत ता आप ऐक्षन्त" उस तेज ने ईक्षण किया उन जलों ने ईक्षण संकल्प किया इत्यादिस्थल में अचेतन जल तेज में जिस प्रकार से गौण ईक्षण व्यवहार है उसी तरह अचेतनानुमानिक प्रधान में भी गौण ही ईक्षण व्यवहार होगा तथा प्रधान में जगत् कारणता की सिद्धि भी होगी। आप लोग भी "अस्मान्मायी

सत्पदवाच्यो न तु गौणार्थमादाय प्रधानस्य ग्रहणमुचितम् । तथाऽचेतने प्रधाने सचेतनस्य श्वेतकेतोस्तादात्म्य प्रतिपादनं सर्वथैवा सङ्गतं स्यात् तस्मात् 'तत्तेज' इत्यादि स्थलेष्वपि सतः परमात्मन एव ग्रहण मिति । सूत्रार्थस्तु अचेतनयोरपि जलतेजसोः 'तत्तेज ऐक्षत ता आप ऐक्षन्त" इत्यादि श्रौतस्थलेऽपीक्षणं यथा गौणमवदृष्यते नहि जले तेजसि च मुख्यमीक्षणं सम्भवति । अनेनैव प्रकारेण सदेवेत्यादि वाक्येऽपि सत्-पद बोध्ये सांख्यपरिकल्पिताचेतने प्रधानेऽपि संकल्पो गौण एव भवेत् । ततश्च प्रधानमेव सर्वजगतः स्वातन्त्र्येण कारणं भवतु न तु परमात्मनि जगतः कारणतेति चेन्न कुतः? आत्मशब्दात् । अर्थादिदमीयोत्तरवाक्येषु चेतनबोधकात्मशब्दस्य प्रयोगदर्शनात् तथाहि सदेव सौम्येदमग्र आसीदित्यारभ्य तत्तेज ऐक्षत इत्याद्यन्तप्रकरणेन पृथिव्यप्तेजसां सृष्टिं प्रतिपाद्य तानि चाग्रिम वाक्ये तदेव सत्पदबोध्यं संप्रत्येकं देवतापदेनानुकृष्य कथयति "सेमं देवतैक्षत" "हन्तमहमिमास्तिस्त्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकरवाणीति" इत्यादि श्रुतिषु जीवेन सह मुख्य स्य सतः तादात्म्यं दर्शयति, न चेदं तादात्म्यं चेतनाचेतनयोः सम्भ वति, किन्तु चेतनस्य जीवस्य चेतनात्मकेन परमात्मना सर्वशरीरकेणैव

सृजते इत्यादि श्रुतियों के अनुरोध से तो कारणता प्रधान में मानते ही है, तब स्वातन्त्र्येण गौण ईक्षण धर्म का स्वीकार कर सम्पूर्ण जगत् की कारणता स्वतन्त्र रूप से प्रधान में ही मानिये, अपरिणामी परमेश्वर की जगत्कारणता का प्रतिपादन किस तरह से करते हैं? एतादृश पूर्वपक्ष के उत्तर में वृत्तिकार कहते हैं इति चेन्न इत्यादि । ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्वमसि श्वेतकेतो" यह परिदृश्यमान चेतनाचेतन सर्वपदार्थ परमात्मस्वरूप है और वह परमात्मा सार्वदिक सत्य हैं हे श्वेतकेतु तुम भी तादृश सर्वशरीरक परमात्मा श्रुत होने से तत्स्वरूप ही हो । इसके आगेके प्रकरण में सत्पद का

संभविष्यति, तस्मात् सदेवेत्यादि वाक्ये कारणरूपेण परमात्मन एव ग्रहणं न्याय्यं न तु जडस्य प्रधानस्य, चेतनाचेतनयो स्तादात्म्यानुपपत्तेः ईक्षणमपि मुख्यमेवग्राह्यं न तु गौणम्। अर्धजरती न्यायस्यानुचितत्वात्। यदि कुत्रचिदचेतनेऽपीक्षणं दृष्ट्वा कथयसि गौणमीक्षणं न तत्रापि जलाद्यचेतने तदीक्षणं, किन्तु अन्तर्यामित्वेन प्रतिपादितपरमात्मनो जडाजडशरीरवतः सर्वशेषिण एव तदीक्षणम्। जलादावन्तर्यामितया तस्य सर्वनियमनकर्तृत्वं तु शास्त्रे प्रसिद्धमेव। तथाहि "यस्तेजसि तिष्ठन्तेजसोऽन्तरोऽयं तेजो न वेद यस्य तेजःशरीरं तेजसोऽन्तरोयमयत्येष त आत्माऽन्तर्याम्यमृतः योऽप्सुतिष्ठन्तदापोऽन्तरो यमापो न विदुर्यस्यापः शरीरं योऽपोऽन्तरोयमयत्येषत आत्मान्तर्याम्यमृतः" "यः सर्वेषु भूतेषु तिष्ठन् सर्वेभ्यो भूतेभ्योऽन्तरो यं सर्वाणि भूतानि न विदु र्यस्य सर्वाणि भूतानिशरीरम्"। तथा "ईश्वरः सर्व भूतानां हृद्देशेऽर्जुन तिष्ठति। भ्रामयन् सर्वभूतानि यन्त्रारूढानि मायया॥ (गी.१८-६१) इत्यादि श्रुतिस्मृति पुराणादिषु तथा श्रवणात्। परमात्मनस्तेजःप्रभृतिषु तदन्तर्यामित्वेन परमेश्वरशरीरित्वेन तेजः प्रभृतीनां च परमात्मनः शरीररूपेण श्रवणादीक्षणादेः शरीरधर्मत्वस्य श्रुति–युक्तिभ्यां बाधावगमात्तेजः प्रभृत्यन्तरयामित्वेन समवस्थितस्य परमात्मन एव मुख्य

वाच्य जो अर्थ है उसका आत्मशब्द से प्रतिपादन किया है, और आत्मा शब्द चेतन परक है इससे सिद्ध होता है कि—चेतन में ही ईक्षण धर्म है नकि जड प्रधानमें। और जिसकिसी भी स्थल में अचेतन में ईक्षण का श्रवण होता है वहां भी उन वाक्यों का उपक्रमस्थ वाक्य के अनुसार ही अर्थ करना चाहिए। यथा "तेज ऐक्षत, इस वाक्य का यह अर्थ है कि–तेज है शरीर जिसका एतादृश परमात्माने ईक्षण किया तो तेजशरीरावच्छिन्न परमात्मा का ही ग्रहण होता है। न तु जडीभूत विशेषणांश में ईक्षण है अपि तु विशेष्यांश परमात्मा में ईक्षण मुख्यरूप से है। एवं आत्मा वा इदमग्रे इस वाक्य का तथा 'सदेव'

तन्निष्ठस्य मोक्षोपदेशात् ।१।१।७।

इतश्च न प्रधानं सत्पदवाच्यम् । यतः सत्पदवाच्यात्मनिष्ठस्य विदुषः "तस्यतावदेवचिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" विदेषः (छा०६।१४।२) इति ब्रह्मसम्पत्तिरूपो मोक्ष उपदिश्यते । यद्यत्र सच्छब्देन केवलं प्रधानमेवोच्येत तर्हि तन्निष्ठस्य मोक्षोपदेशो न स्यात् । नह्यचेतनप्रधानोपासनेन मोक्षोपलब्धिः सम्भवति ॥७॥

मोक्षणाख्यो धर्म इति व्यवस्थितत्वात् प्रकृते सदेवसौम्येत्यादि सत्पदवाक्येष्वपि सत्पदवाच्यस्य सर्वशरीरकस्य परमात्मन एव मुख्यमीक्षणम् । नतु जडात्मके प्रधाने तदीयकार्ये वा ईक्षणरूपो धर्मः सम्भवति ।

क्वचित् क्वचिदचेतनेऽपि ईक्षणव्यपदर्शनात् गौणमीक्षणं परिग्रहीतव्यं मुख्यं वेक्षणं परिग्रहीतव्यमिति भवति संशयः । ततश्च तेषामपि वाक्यानां वेदत्वेन प्रामाणिकत्वात्तदनुकूलत्वेन गौणमेवेक्षणं परिग्रहीतव्यं तेनापि प्रकृतोपयोगित्वस्य सिद्धिर्जायत एवेति पूर्वः कल्पः । तथापि "गौणः मुख्ययो र्मुख्य एव कार्य सम्प्रत्ययः" इति न्यायेन तथा परमेश्वर कारणत्वेऽनेकश्रुतिस्मृतिपुराणादि स्वरसेन च मुख्यमेवेक्षणं परिग्रहीतव्यमिति वैदिकोऽयं राजमार्गः । गौणमार्गस्तु प्रतिकूलत्वात् श्रुतिसूत्रविरुद्धत्वाच्चाग्राह्यमेवेतिसंक्षेपः ॥६॥

विवरणम्—ननु, सदेव सौम्येदमग्र आसीदित्यादि कारणता प्रतिपादक वाक्यघटकसत्पदम्, स आत्मा तत्वमसि इत्यादि समानार्थकवाक्यघटकात्मशब्दप्रयोगबलात् । मुख्येक्षण कर्तृपरमात्मपरकमेव नतु प्रधान इत्यादि वाक्य का समानार्थक होने से एक वाक्यता करने पर सत्पदवाच्य परमात्मा में ही मुख्य ईक्षण सिद्ध होता है । अतः उसी में कारणता है, प्रधानादिक अचेतन में नहीं इति संक्षेप ॥६॥

सारबोधिनी— "सदेव सौम्येदमग्रआसीदेकमेवाद्वितीयम्" इत्यादि छान्दोग्यलक्षणकारणताबोधक जो सत्पद है, वह "अयमात्मा तत्वमसिश्वेतकेत

परकमिति षष्ठसूत्रे प्रतिपादनेन ज्ञायते, परन्तु तन्नयुक्तं यतोह्येकमेवात्मपदमात्मनस्तथात्म सम्बन्धिनः प्रधानस्यापि बोधकं स्यात्। यथा आत्मनि आत्मशब्दप्र योगस्तथा आत्म सम्बन्धिनि प्रधानेऽपि स्यात्। प्रधानमात्मनः सर्वार्थकरि तदुक्तम्, सर्वं प्रत्युपभोगं यस्मात्पुरुषस्य साधयति बुद्धिः सैव पुरुषार्थं प्रति विशिनष्टि पुनः प्रधान पुरुषान्तरंसूक्ष्म, मिति। बुद्धिरेव पुरुषस्य सर्वोपभोग साधयति तथा सैव मोक्षमपि साधयतीति पुरुषस्य सर्वार्थसाधके प्रधानेऽपि सम्भवेदेवात्मशब्दप्रयोगः। लोकेऽपि उपकारि पुरुषे आत्मशब्दप्रयोगो यथा 'ममात्मा भद्रसेनः' इत्यादि स्थले। तस्मात्केवलमात्मशब्दप्रयोगबलेनात्मीयस्य प्रधानस्य निराकरणं न सम्भवति, इत्यादि शङ्कानिराकारायाग्रिम सूत्रस्यावतरणमाह वृत्तिकार इतश्च प्रधानं न सत्पदवाच्यमित्यादि, अयं भावः, तन्निठस्यमोक्षोपदेशादि ति। अत्र सत्पदवाच्य परमात्मनिष्ठोपासकस्य शिष्यस्य मोक्षोपदेशः श्रूयते,; स च मोक्षोपदेशः प्रधानस्य कारणवाक्यघटक सत्पदवाच्यत्वे कथमपि न सम्भवति; किन्तु यदि सत्पदवाच्यः परमात्मास्यात्तदैव परमात्मोपासनयोपासन कर्तु मोक्षः स्यात्। स्वर्गापवर्गयोर्मार्गमामनन्ति मनीषिणः। यदुपास्ति मसावत्र परमात्मा निरुप्यते इन्याद्यभियुक्तोक्त स्थले परमात्मन उपासनयैव मोक्षप्राप्तेः कथनात्।

इत्यादि अग्रिम समानार्थक वाक्यके समानार्थक होने से तद्घटक आत्मपद के अनुरोध से परमात्मपरक है, तादृशपरमात्मा सत्पदवाच्यमुख्य ईक्षणवान् है, तथा वही परमात्मा जगत्का उपादान कारण भी है, ऐसा निश्चित किया है, परन्तु यह ठीक नहीं है, क्योंकि— आत्मा शब्द का अर्थ जिस प्रकार आत्मा होता है, उसी तरह आत्मा सम्बन्धी मैं भी होता है, तो प्रकृत में आत्मा का सर्वथा उपकारक प्रधान भी आत्मपद बोध्य हो सकता है, जीवात्माको जो कुछ शब्दादि पदार्थ का उपभोग होता है, उसका निदान कारण प्रधान है, तथा वही प्रधान अति सूक्ष्म प्रधानपुरुषका भेद ज्ञान कराकर मोक्ष का भो

नत्वचेतनोपासनेन मोक्षो भवती ति कुत्रचिदपि प्रतिपादितम् । तस्मात् सत्पदवाच्यः परमात्मैव, न तु परमात्म सम्बन्धि प्रधानं प्रधानकार्यं बुद्धया दिकं वेति । तथाहि छान्दोग्ये, सदेव सौम्येदमग्र आसीदित्यादिना उपक्रमं कृत्वा "अनेन सौम्य शुङ्गेनापोमूलम न्विच्छ । इत्यारभ्य सन्मूला सौम्येमाः प्रजाः सर्वा सदायतनाः सत्प्रतिष्ठाः, इत्यत्र सत्पदवाच्य परमात्मन एव सर्वप्रजामूलत्वेन प्रजायाउत्पादकत्वप्रजाया आयतनत्वेन प्रजास्थितिकारणत्वं तथा सर्वप्रजाप्रतिष्ठात्वेन सर्वप्रजाप्रलयकारणत्वं च दर्शयित्वा पुनरपि श्रावयति "अस्य सौम्य पुरुषुस्य प्रयतो वाङ् मनसि– तेजः परस्यां देवतायां; स य एषोऽणिमा,, इत्यादिस्थले पूर्वप्रकृतं सत्पदप्रतिपाद्यं परदेवताशब्देनाणिमशब्देन च तमेव संगृह्य तदनन्तरम् "ऐतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसिश्वेतकेतो" इहापि स आत्मा एवं रूपेण पूर्वप्रकान्तस्य सत्पदवाच्यस्य चेतनस्य परमात्मन एव पूनरपि संग्रहः कृतः । एतत्परि दृश्यमानं सर्वं तदात्मकमित्यनेन सम्पूर्णस्य स्थावरजङ्गमात्मकसर्व जगतः सदात्मकत्वं विज्ञाप्य, तत्वमसि श्वेतकेतो, अनेन चेतनस्य श्वेत केतोरपि सदात्मकत्वोपदेशेनसदात्मनित्यतैव प्रतिपादिता । तदनन्तर

प्रयोजक बनता है । अतः कारण वाक्य घटक सत्पद प्रधान का ही बोधक है, तथा प्रधान ही जगत का कारण भी हैं ।

इसप्रकार जो पूर्वपक्ष होता है, तादृश पूर्वपक्ष का निराकरण करने के लिए सप्तम सूत्र का उत्थान करते हुए कहते है–इतश्चप्रधानमित्यादि । इन वक्ष्यमाण हेतुओं से सिद्ध होता है कि सांख्यपरिकल्पित स्वतंत्रप्रधानकारणवाक्यघटक सत्पदवाच्य नहीं हो सकता क्यों कि सत्पदवाच्य जो परमात्मा है उस परमात्मामें निष्ठा रखने वाले विद्वान् को अर्थात् – जो उपासक परमात्मा की उपासना करता है, उसको परमात्मोपासना के परिपाक होने पर मोक्ष प्राप्ति का उपदेश शास्त्र करता है । कौन

सत्परमात्मकत्वेन तथा परमात्मव्याप्यत्व रूपेण प्रत्यगात्मानुसन्धान निष्ठस्योपासकस्य शिष्यस्य 'आचार्यवान् पुरुषो वेद, इतिक्रमेण तस्यतावदेव चिरम्, इति कथनेन मोक्षोपदेश श्रूयते श्रुतौ ततश्च पूर्वक थित परमात्मविषयकतत्वज्ञानवतः पुरुषस्य, 'तत्त्वमसि' इत्याद्यु पदेशेन जायमानं परमात्मना सह स्वस्य तस्याऽहमित्याकारकाभेद लक्षणतादात्म्यज्ञानमेव मोक्षायालं, न तु उपदेष्टव्यस्याचेतन प्रधानादिना सह जायमानं तादात्म्यज्ञानं मोक्षजनकं स्यात् । प्रत्युता चेतनेन सह जायमानं तादात्म्य ज्ञानं संसारायैव भविष्यतीति महदनि-ष्टमापतेत्, तथा एतादृशमभेदज्ञानमुपदिश च्छास्त्रं गुरुरपि कथमिव प्रामाण्यं प्राप्नुयात् ?

तस्मात्कारणवाक्यघटकं सत्पदमात्मपदश्च चेतनं लक्ष्यीकृत्य परमात्मानं बोधयति न तु कदाचिदपि आत्मनः सर्वार्थसाधकं प्रधानं तदतिरिक्तं वा बुद्ध्यादिकंमवगमयतीति सूत्रवृते: संपिण्डितोऽर्थः सम्पद्यते शास्त्र युक्तिसिद्धः ।

ऐसा शास्त्र है जो परमात्मोपासक को मोक्षप्राप्ति बतलाता है, एतादृश जिज्ञासा के उत्तर में वृत्तिकार बतलाते हैं—"तस्य तावदेव चिरं यावन्न विमोक्ष्ये ऽथसम्पत्स्ये" जो उपासक साधन चतुष्टय वैराग्यादि से सम्पन्न होकर भक्ति प्रपत्ति के द्वारा भगवान् साकेताधिपति की अनवरत उपासना करने में संलग्न है, उस उपासक को संसार सागर पार करने में तब तक ही विलम्ब होता है, जब तक कि प्रारब्ध कर्म से प्राप्त वर्तमान शरीर का पतन नहीं होता। प्रारब्ध कर्म फलोपभोग के बाद वर्तमान शरीर पात के अनन्तर वह उपासक सत्पदवाच्य परमात्मामें सम्पन्न हो जाता है(अर्थात् साकेतप्राप्ति लक्षणसायुज्य मोक्ष को प्राप्त कर लेता हैं) उपर्युक्तवेद वाक्य ब्रह्म सम्पत्ति रूप मोक्ष का उपदेश करता है । इस स्थिति में सांख्य की श्रद्धा को अनुसरण कर यदि सत् शब्द केवल प्रधानवाचक मान लिया जाय तब तो प्रधान की उपासना संलग्न उपा-

सूत्रार्थस्त्वेवम्–तस्मिन् सत्पदवाच्ये परमात्मनि चराचरजगत् कारणे श्रीरामे निष्ठा अवस्थानं जातं यस्य अथवा तस्मिन् उपासना जाता यस्य तादृशस्योपासक पुरुषस्यैव "तत्त्वमसि" "अथ सम्पत्स्ये" इत्यादिना मोक्ष प्रतिपादनात् तत्पदवाच्यः परमात्मैव न तु परमात्म सम्बन्धि प्रधानादिकं सत्पदवाच्यमिति ।

यद्यपिवृत्तिग्रन्थोऽति रोहितार्थ इवाभाति, तथाऽप्यक्षरार्थमात्र विवृणोमि, इतश्च वक्ष्यमाण हेतुभिरपि सदेवेत्यादि कारण वाक्य घटकं सत्पदं न सांख्य परिकल्पिताचेतनप्रधानस्य बोधकमपि तु सर्वशरीरकस्य परमात्मनो जगदुत्पत्तिस्थितिलयकारणस्य विज्ञापकम् । प्रधानं सत्पदवाच्यं न भवतीति प्रतिज्ञा मात्रेण कथितम्, न च केवलं प्रतिज्ञा साधिका, अपि तु व्याप्तिपक्षधर्मताविशिष्टहेतुरेव बोधकः । तदुक्तम् सम्भावितः प्रतिज्ञायां पक्षः साध्येत हेतुनेति अतो हेतु प्रदर्शनायाह-यतः इत्यादि । यतः–यस्मात् कारणात् सदेव सौम्येदमित्यत्र सत्पदवाच्यो

सक को जो मोक्षोपदेश किया गया है, वह अनुपपन्न हो जायगा । क्योंकि अचेतन जो प्रधान है, तादृश प्रधान की उपासना से तो मोक्ष की प्राप्ति कथमपि संभवित नहीं है, अपितु चेतन सर्वसमर्थ परमात्मा की उपासना से ही मोक्ष सम्भवित हैं । प्रकृत विषय को प्रस्थान त्रयानन्द भाष्यकार जगद्गुरु श्री रामानन्दाचार्य जी ने निम्नरूपसे उपदेश किया हैं श्री वैष्णवमताब्ज भास्कर में "एवं महान् भागवतः सुसंस्कृतो रामस्य भक्तिं परमां प्रकुर्यात् । महेन्द्रनीलाश्मरुचेः कृपानिधेः श्रीजानकीलक्ष्मणसंयुतस्य वै ॥ उपाधिनिर्मुक्तमनेकभेदका भक्तिः सयुक्ता परमात्मसेवनम् । अनन्यभावेन मुहुर्मुहुः सदा महर्षिभिस्तै स्वलुतत्परत्वतः । सा तैलधारासमनित्यसंस्मृतेः सन्तानरूपेशि परानुरक्तिः । भक्तिः विवेकादिकसप्तजन्या तथा यमाद्यष्टसुबोधकाङ्गा ॥इति।

इस विषय में आचार्य उदयन ने भी कहा है

"स्वर्गापवर्गयो र्मार्ग मामनन्ति मनीषिणः ।
यदुपास्ति मसावत्र परमात्मा निरूप्यते ॥

यः परमात्मा तद्विषयकोपासनायुक्तस्यैव विदुषो मोक्षमुपदिशति । "तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ सम्पत्स्ये" इत्यादि शास्त्रम् (तस्य भक्तिप्रपत्तिभ्यां परितोषित परमात्मन उपासकस्य तावत्कालमेव विलम्बो जायते, यावत्पर्यन्तं प्रारब्धकर्म समुपस्थापित देहस्य विमोक्षणं न भवति अथ शरीरपातानन्तरं तु सम्पत्स्यते साकेताधिपसायुज्यमित्यर्थः)

एवं चोपदेष्टव्यस्योपासकस्य चेतनत्वात्तस्य, आत्मस्वरूपतयो पदिश्यमानमुपसंहारमात्मपदं कथमिवाचेतनमुपदिशेत् । नहि चेतनस्यात्मभूतमचेतनं स्यात् । यदातु उपसंहारस्थकारणताबोधकमात्म पदं न बोधयत्यचेतनं कारणं तदा कैव कथा उपक्रमस्थं सत्पदमचेतनं बोधयिष्यति ? उपक्रमोपसंहाराभ्यामेव श्रुत्यर्थनिर्णयस्य निर्धारणात् । तत्रश्चोपसंहारे श्रूयमाणं पदं यदा चेतनपरमेश्वरपरकं तदोपसंहारानुरोधादुपक्रमे विद्यमानं सत्पदमपि सर्वकारणभूतं परमात्मानमेव बोधयति न कथमपि क्लिष्टकल्पनयोपस्थापितमचेतनं प्रधानम् । मोक्षोपदेशा

(स्वर्ग के समान जो जीवन मोक्ष तथा परम मोक्ष का मार्ग अथवा स्वर्ग तथा मोक्ष प्राप्ति का मार्ग जिस परमात्मा की उपासना को तत्त्व वेत्ता पुरुष प्रतिपादन करते हैं तादृश परमात्मा का निरूपण इस प्रसूनाञ्जलि प्रकरण में मैं करता हूँ) इत्यादि प्रमाणों से सिद्ध होता है कि– चेतन सर्व समर्थ परमात्मा की उपासना ही मोक्ष का जनक है । इसप्रकार अचेतन प्रधान की उपासना करने से मोक्ष प्राप्त होता है, ऐसा तो कहीं भी नहीं प्रतिपादन किया गया । इसलिए "सदेव सोम्येदमग्रे" इत्यादि वाक्यों में जो सत्शब्द है, वह परमात्मा का ही बोधक है आनुमानिक सांख्य परिकल्पित प्रधानका बोधक नहीं है ।

"तन्निष्ठस्य मोक्षोपदेशात्" इस सूत्र का यही उपर्युक्त अर्थ होता है । संक्षिप्त अभिप्राय यह है कि अचेतन की उपासना से मोक्ष होता है, इसप्रकार शास्त्र में नहीं बतलाया गया है और परमात्मा की उपासना से मोक्ष प्राप्त

हेयत्वाऽवचनाच्च १।१।८।

इतश्च प्रधानाद्भिन्नं सत्पदवाच्यम्। यदि प्रधानमेव सत्पदाभिधेयं स्यात्तर्हि मोक्षप्राप्तये तदात्मत्वेनानुसन्धानं नोपदिशेत्, अपि तु मोक्ष विरोधीत्वेन हेयत्वमेवोपदिशेत्. नह्यत्र तथोपदिश्यते ॥८॥

न्यथानुपत्त्या परमात्मैव सत्पदवाच्यो न कथमपि प्रधानं सत्पदवाच्य मिति वेदान्त डिण्डिम इति। एतदेव दर्शयति वृत्तिकारः "यद्यत्र सच्छब्देनेत्यादि" यदि समुपस्थापित श्रुतौ स्वतन्त्रं प्रधानमेवोपस्थापितं भवेत्तदा अचेतन प्रधानोपासकस्य मोक्षोपदेशो न सम्भवेत् न ह्यचेतनस्य प्रधानस्योपासनया मोक्षप्राप्ति र्भवतीति शास्त्रे क्वापि श्रुतमुपपद्यते नवा कदाचिद् युक्त्यावेति, प्रत्युताचेतनोपसनं संसारफलायैव भवति न तु मोक्षफलायेति संक्षेपः ॥७॥

वृत्तिविवरणम्– "एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इत्यत्र हेयत्व वचनाभावान्नसच्छब्द वाच्यं प्रधानम्। यदि तदेव स्यात्तदा तदनात्म तत्वं त्वं नासि, अतस्तदात्मकत्वेनात्मानं नानुसंधत्स्व, तदनुसंधानस्य मोक्षविरोधित्वादित्येवं माता पितृ सहस्र वत्सल होता है, इस बात को शास्त्र ने बारंबार अनेक स्थलों में प्रतिपादित किया है अतः आनुमानिक प्रधान सत्पदवाच्य नहीं है किन्तु सर्वेश्वर सर्वसमर्थ भगवान् साकेताधिपति जिनके भ्रूभंगविलास मात्र से जगत् के उत्पत्ति स्थिति विनाश होते हैं, वे ही कारण वाक्यघटक सत्पद वाच्य हैं। और वे ही केवल भक्तो से समुपासनीय हैं। इस विषय पर विशेष जिज्ञासु श्रीमदानन्द भाष्यका अवलोकन करें।

सारबोधिनी–ज्ञेयजो परमात्मा है वह तो "अणोरणीयान्" एषोऽणुरात्म "वालाग्र शतभागस्य"(अणु रूप से अभीमत जो परमाणुप्रभृतिक पदार्थ हैं उससे भी अधिक अणु अर्थात् परमसूक्ष्म हैं। यह आत्मा अणु है, वाल का जो

तरेण परमहितानुशासनपरेण वेदेनोपदिष्टं स्यात्। यथारुन्धतीं दिदर्शयिषुस्तत्समीपस्थताराणां हेयत्वं स्पष्टं निर्दिशति तद्वदिहापि स्यान्न च तथा दृश्यते।

अथ परमसूक्ष्मं परमात्मतत्वंसर्वैरप्यभीप्सिततमम्। तादृशं च तत्त्वम् "अणोरणीयान्" "एषोऽणुरात्मा" वालाग्र शतभागस्यशतधा कल्पितस्य च "सूक्ष्मात्सूक्ष्मतरं पदम्" "यतो वाचो निवर्तन्तेऽप्राप्यमनसा सह" "तंदूर्दर्शंगूढमनुप्रविष्टम्" इत्यादि श्रुतिशतैस्तस्यातिसूक्ष्मतयावोधितं तादृशंञ्चसूक्ष्मतत्त्वमविशुद्धान्तःकरणं श्वेतकेतुं प्रथमतो ग्राहयितुं न शक्यमिति तादृशसूक्ष्मतत्त्वसंबद्धं प्रधानं यत् परमतत्वापेक्षया किंचित्स्थूलमिवविद्यते, तादृशप्रधानतयेवात्मरूपेण सर्वप्रथमं ग्राह्यते श्वेतकेतुर्गुरुणापरमकारुणिकेन। यथाऽति सूक्ष्मामरुन्धतीं तारां दर्शयितुं प्रथमोऽरुन्धत्याः समीपे स्थितां तदपेक्षया किंचित्स्थूलां तारामेवेयमरुन्धीति दर्शयति बालकं तदीयहितचिन्तक स्तथैव प्रकृते ज्ञेय यत्तत्त्वंतदतीवसूक्ष्मं प्रथमतस्तदीयज्ञानमशक्यमिव ज्ञात्वा परमतत्व-समीपस्थितं परमतत्त्व- संबद्धपरमतत्वा

अग्र भाग, उसका भी शतांश भाग न्यून परिमाण परिमित आत्मा हैं) इत्यादि श्रुति प्रभृतिक शास्त्र से ज्ञान होता है कि—ज्ञेयतत्त्व अतिसूक्ष्म है। तो सहसा सूक्ष्म वस्तु का प्रति पादन करने से शिष्य को यथा वत् ज्ञान नहीं होगा। अतः सूक्ष्मतत्व के समीपवर्ती तदपेक्षया किंचित्स्थूल जो प्रधान है उसी का आत्म रूपसे शास्त्र प्रतिपादन करता हैं। जैसे अतिसूक्ष्म तारा को समझाने के लिये तत्समीपवर्ती स्थूल प्राय अन्य तारा को समझाया जाता है तद्वत् प्रकृत में भी समझना चाहिये। एतादृश शंकाका निराकरण करने के लिये वृत्तिकार सूत्र का उत्थान करने के लिये कहते है इतश्च प्रधानाद्भिन्नं सत्पदवाच्यमित्यादि। इस कारण से वक्ष्यमाण जो कारण है उस से भी सिद्ध होता है कि— "सदेव सौम्येदमग्र,, इत्यादि वाक्य घटक जो सत्पद है उस का वाच्य अर्थ प्रधान सांख्य मतकल्पित आनुमानिक पदार्थ से

पेक्षया जड़त्वेन किंचित्स्थूलमिवावभासमानं सांख्यमतकल्पितमानुमानिक प्रधानमेवात्मरूपतया शास्त्रं बोधयति न तु परमसूक्ष्मंपरम तत्त्वं बोधयति शास्त्रमशक्यत्वात् । अतोऽरुन्धतीय न्यायेन प्रधानस्यै-वात्मरूपेण बोधनं भवतीतिपूर्व पक्षाभिप्रायं ज्ञात्वा तादृश शंकामपनेतुं सूत्र-काराशयप्रकटनाय सूत्रमुदाहर्तुमाह वृत्तिकारः इतश्च प्रधानाद्भिन्नं सत्पदवा-च्यमिति । इतो वक्ष्यमाणहेतुनापि प्रधानमानुमानिकं न सत्पदवाच्यम् । कुतो न सत्पद वाच्यं प्रधानं तत्र हेतुं विनिर्दिशति सूत्रकारः हेयत्वाव-चनात् । सूत्राशयं प्रकटयति वृत्तिकारः "यदि प्रधानमेव सत्पदाभिधेयं स्यादि-त्यादि, यदि कदाचित्प्रधानमेव प्रकृत सत्पदेनाभिधीयमानम-भिमतं शास्त्रस्य भवेत् तदा निरतिशय सुखात्मकमोक्षस्य प्राप्त्यर्थं तस्-यात्मरूपेण कथनं न कुर्यात् । प्रत्युतानात्मदृष्टेर्मोक्षविरोधित्वेन प्रधा-नस्य हेयतामेव ब्रूयात् । ननु प्रकृते सत्पदवाच्यस्य हेयतां प्रतिपादि-तवान् । अर्थात् यदि प्रकृतेऽनात्मतास्यात्तदा अनात्मज्ञानस्य मोक्षजनक त्वाभावात् मोक्षाय प्रवर्तमान उपदेशः पुनस्तद्व्यतिरिक्तं किमप्यात्म

भिन्न सर्वतन्त्र स्वतन्त्र स्वमहिमामात्र से चिदचिद्विशिष्ट सकल स्थूल जगत् का उपादान तथा निमित्त करण है, प्राधन नहीं यदि कदाचित् तुष्यतु दुर्जनन्याय से सत्पदवाच्य प्रधान ही होता तब तो मोक्षयितव्य जो चेतन श्वेतकेतु है उसको मोक्ष प्राप्ति के लिए उस जड़ चेतन प्रधान में आत्म रूपसे अनुसन्धान करने का उपदेष नहीं किया जाता क्योंकि तुम अचेतन प्रधान स्वरूप हो इस कथन से प्रधानोपासना में तत्पर उस शिष्य को तादृश जडोपासना से मोक्षप्राप्ति असंभव है । प्रत्युत तादृश अचेतन में चेतन को तादृश उपासन तो संसार की जनि का होगी यह समझ कर उस अचेतन में हेयता का ही कथन करना उचित होता है, परन्तु तादृश हेयत्व का कथन नहीं किया है। जैसे सूक्ष्म अरुन्धती को समझाने के लिए एकाएक प्रथमत अरुन्धतो का उपदेश न देकर पहिले

तत्वं विनिर्दिशेत् पूर्वस्मिन् हेयतामुपपादयेत् परन्तु नात्र प्रथमत उपदिष्टस्य हेयतामवदत्। अतः प्रधानं न सत्पदवाच्यमपि तु परमात्मैव सत्पदवाच्यः। परमात्मज्ञानस्य मोक्षजनकत्वमिति सर्वश्रुति सूत्र स्मृति पुराणानुमोदितः पन्थाः। अयं भावः यदि कदाचिनात्मभूतं प्रधानमानुमानिकमेव सत्पदमभिलप्यमनुमतं भवेत् "एतदात्म्यमिदं सर्वं तत्सत्यं स आत्मा तत्त्वमसि श्वेतकेतो" इत्यादि शास्त्रे तदेवपूर्वोदितं वस्तूपदिष्टं स्यात्। सचेतनः श्वेतकेतुस्तदुपदेशश्रवणेनानात्मज्ञतया अनात्मोपासको न भवतु इति कृत्वा मुख्यं यत सत्सूक्ष्मं चेतनात्मकं परमात्मतत्त्वं तादृश तत्त्वस्योपदेशाय पूर्वोपदिष्टस्यानात्मतत्त्वस्य परित्याज्यतां प्रदर्शयेत्। यथा अतिसूक्ष्मामरून्धतीतारामुपदिदिक्षुः प्रथमतोऽरून्धती समीपवर्तिनीममुख्यामेवतारामरून्धतीति दर्शयित्वा पुनरमुख्यामरून्धतीं प्रत्याय्य मुख्यलक्षणामरून्धतीं प्रतिपादयति तद्वत् प्रकृतेऽपिशुद्धान्तः करणव्यक्तिभिर्ग्रहणासमर्थस्य सूक्ष्मतत्त्वस्यामुख्यतत्त्वमुपदिश्य मुख्यं तत्त्व

अरुन्धती के समीपस्थ अरुन्धती संबद्ध अमुख्य तारा का उपदेश देकर उससे उसका निराश करके मुख्य अरुन्धती का उपदेश किया जाता है, और अमुख्य तारा को हेयता का प्रतिपादन किया जाता है, इसी प्रकार प्रकृत में अमुख्य सत्पद—वाच्य प्रधान में हेयता का कथन करना उचित होगा परन्तु हेयता का प्रतिपादन तो नहीं किया है। इससे यह सिद्ध होत है कि कारण वाक्यमें प्रधान से भिन्न ही पदार्थ सत्पद वाच्य है, न कि प्रधन सांख्य परिकल्पित सत्पद वाच्य है। एवं सूत्र—घटक जो च शब्द है सो प्रधान को सत्पद—वाच्य मानने पर प्रतिज्ञा—विरोध लक्षण— दोष का भी कथन करता है। तथा हेयत्व वचन—रूप दोष का रहते हुए ही प्रतिज्ञा का विरोध होता है प्रधान को सत्पद वाच्य कहने में, क्यों कि—कारणके विज्ञान से सर्व विज्ञान की प्रतिज्ञा की गई है आत्मादेशामप्राक्ष्यो येना श्रुतं श्रुतं भवत्यमतं मतं भवति इत्यादि से लेकर यथा सौम्यैकेन मृत्पिण्डेन

मेवोपदिशेत् प्रथमोपदिष्टतत्त्वं ज्ञेयत्वेन प्रत्याख्याय। न तु तथा कृतवान् शास्त्रेऽतो ज्ञायते यत् न प्रधानस्य सत्पदवाच्यतयेहोपदेशोऽभिमतोऽपि तु मुख्यस्यैवतत्त्वस्योपदेशोऽभिमतः। आत्मज्ञानं च मोक्षजनकं न तु जड़ ज्ञानं मोक्षजनकमिति सर्वेषामपि वादिनां प्रक्रिया।

अत्र सूत्रघटकश्चकारः प्रतिज्ञाविरोधात्मकं कारणमपि संगृह्णाति तथाहि उततमादेशमप्राक्ष्यो येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातमिति कथं नु भगवः! स आदेशो भवतीति यथा सोम्यैकेन मृत्पिण्डेन सर्वंमृन्मयं विज्ञातमित्यादि छान्दोग्ये श्रुतम्, वाक्यस्य प्रारम्भ-समये अर्थात् कारणविज्ञानेन समस्तस्य कार्यस्य विज्ञानं भवति, तद्यदि चेतनं सर्व-कारणं विज्ञानं स्यात्तदा तादृशसर्वचिदचित्कारणलक्षणपरमात्मविज्ञानेन तं चिदचिदात्मकं सर्वमपि कार्यं विज्ञातं स्यादिति एकविज्ञानेन सर्वविज्ञानप्रतिज्ञा अविघ्नितरूपेण समर्थिता भवेत्। अथ यदि प्रधानं सत्पदवाच्यं तस्य सर्वजगत् कारणत्वं च स्वीक्रियेत तदा जड़ात्मककार्य विज्ञातेन सर्वं मृन्मयं विज्ञातं भवति,इत्यन्त वाक्य के प्रारम्भ में सुना गया है। परन्तु भोग्यवर्ग का कारण प्रधान यदि हेयत्व रूप से अथवा अहेयत्वरूप से विज्ञात होने पर उस प्रधान का कार्य भोग्यवर्ग है वही केवल जाना जायगा, किन्तु भोक्ता जो जीवराशि है सो तो नहीं जाना जायगा क्योंकि—कारण में जो कार्य जाना जायगा जीवराशि वह प्रधान का कार्य तो है नहीं। इस लिये प्रधान इस प्रकरण में सत्—शब्द का वाच्य नहीं है किन्तु परमात्मा ही सत्पदवाच्य हैं। नहीं कहो कि—जिस तरह गोमय जड से चेतन वृश्चिकों की उत्पत्ति होती है, उसी प्रकार जड प्रधान से चेतन की उत्पत्ति होगी यथा वा दुग्धकलश में प्रक्षिप्त जल विन्दु दुग्धज्ञान होने से ज्ञातहोता है, उस तरह प्रधान तथा प्रधान का कार्य शरीरेन्द्रियादि से :ओत प्रोत जीव भी प्रधान के ज्ञान होने पर तत्सम्बद्धजीव भी ज्ञात हो जायगा, तब तो प्रतिज्ञा—विरोधरूप—दोष नहीं होगा तो यह भी कहना ठीक नहीं है, क्यो कि